छांदोग्यभाष्य टिप्पणानंदगिरि

Chhandogyabhashya

4/5

55 pb

1986

रीय

छां·भा·टी· श्रीगणेशाय नमः ॥ ॐ नमः श्रीसदाशिवाय नमः ॥ नमो जन्मादिसंबंधबंधविध्वंसहेतवे ॥ तस्मै हराय परमानंदवपुषे परमा
१ त्मने ॥ १ ॥ नमस्त्रय्यंतसंदोहसरसीरुहभानवे गुरवे परपक्षौघध्वांतध्वंसपटीयसे ॥ २ ॥ छंदोगानामुपनिषद्दृष्टव्याचिख्या
सुर्भगवान्भाष्यकारश्चिकीर्षितग्रंथपरिसमाप्तिप्रचयपरिपंथिदुरितनिबर्हणाय शिष्यशिक्षार्थमोंकारोच्चारणलक्षणं
मंगलाचरणं संपादयन्व्याख्येयस्वरूपं दर्शयति ॥ ॐमित्येतदिति । व्याख्यानसंप्रयोजनं प्रतिजानीते ॥ तस्येइ
ति ॥ ननु शारीरके भूयःप्रदेशेषु विस्तरेण व्याख्यातत्वादमुष्य भाष्यं किमिति संप्रत्यारभ्यते तत्राह संक्षेपत
इति ॥ विस्तरेण व्याख्यातत्वेऽपि संग्रहतो व्याख्यानेऽस्याः संप्रतीयते विस्तृतस्य संक्षिप्य ग्रहणोऽपग्रहत्वादित्य
र्थः ॥ किंच न चेयं यथापाठक्रमं व्याख्याता प्रकृते तु पाठक्रममनतिक्रम्य व्याख्यायते तदर्थमिदं भाष्यमित्याह
ऋजुविवरणमिति ॥ ऋजुपाठक्रमानुसारि विवरणमर्थस्फुटीकरणं प्रकृतोपनिषद्योपस्मिन्भाष्ये तत्त
थेति यावत् ॥ अथ यथापाठक्रममाश्रित्यापि वृत्तिविदं भाष्यं प्रणीतं तत्किमनेनेत्याशंक्याह अल्पग्रंथमिति ॥ तथापि
विशिष्टेऽधिकार्यभावे कथमिदमारभ्यते ॥ तत्राह अर्थजिज्ञासुभ्य इति ॥ येहि मुमुक्षवोऽस्याविवक्षितमर्थं जि
ज्ञासंते तेभ्यो भाष्यमिदमारभ्यते तथा च विशिष्टाधिकारिसंभवे तदारंभः संभवति ॥ तस्य च प्रकृतोपनिषदर्थ
परिज्ञानमवांतरफलं ॥ तत्त्वद्वारा कैवल्यं परमफलमिति भावः ॥ ननु कर्मविधिशेषत्वात् उपनिषदस्तद्व्याख्यानेनैव राम० १

कृतव्याख्यानत्वात्तिष्ठतु विस्तरप्रसंगात् अलंकृतं तत्तद्भाष्येऽतो न्याशंक्य शेषशेषित्वे प्रमाणाभावात् मैवमित्यभि
प्रेत्य पूर्वोत्तरकांडयोर्नियतपूर्वापरीभावप्रयुक्तं संबंधं प्रतिजानाते ॥ तत्रेति ॥ तस्याव्याख्येयत्वेन प्रकृतत्वात्
उपनिषदः कर्मकांडेन सह संबंधोऽभिधीयत इत्यर्थः ॥ कोऽसावित्यपेक्षायां तदभिधित्सया कर्मकांडार्थमनूद्य वृत्ति ॥
समस्तामिति । विहितं प्रतिषिद्धं च कर्म पूर्वस्मिन् कांडे प्रतिपन्नमित्यर्थः ॥ तत्र विहितं समुच्चितमसमुच्चितं चे
ति द्विविधमित्यंगीकृत्य समुच्चितस्य फलमनुवदति प्राणादीति । प्राणाद्यात्मा । अग्निश्चेत्याद्या देवतास्तासां विज्ञानं तदु
पासनं तेन समुच्चितमग्निहोत्रादिकर्म अर्चिरादिपलक्षितेन देवयानेन पथा कार्यब्रह्मप्राप्तौ कारणं । न तु
ब्रह्मप्राप्तौ न स्वर्गं तत्र श्रुत्यभावात् ॥ कार्यस्यैव गंतव्यतया बादर्यधिकरणे राद्धांतितत्वात् तस्मान्न समुच्चितं
विहितं कर्म परमपुरुषार्थहेतुरित्यर्थः । तस्यैवासमुच्चितस्य फलमाह । केवलं चेति । विहितस्य गतिमुक्त्वा प्रतिषिद्ध
स्य गतिमाह स्वभावेति । स्वभावेन शास्त्रापेक्षामंतरेण रागप्रकृतिवशादेव प्रवृत्ता यथेष्टचेष्टा रागासक्तास्तेषां कर्मज्ञा
नाभावाद्देवयाने पितृयाणे चाप्यनधिकृतानां गतिस्तिर्यग्भवस्था क्षुद्रजंतुलक्षणा पुनरावृत्तिर्दुर्लभा ॥ वाक्येना
न्यतरस्मिन्नचाधिकृतानामपरमः पुरुषार्थः इति स्मृतिः शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते इति स्मृतत्वात्तयोर्नित्यफल
त्वप्रतिपत्तेरत आह नचोभयोरित्यादिना तन्मार्गद्वयभ्रष्टानां पुरुषार्थाभावे सिद्धे यः पथोरन्यतरेणाभाविष्यतीति

छां·भा·टी·आ त्वेनत्वनतावद्देवयानपथिनिमित्तेनिरतिशयपुरुषार्थसिद्धिः इमंमावर्त्तंनावर्त्तंते॥ तेषामिहनपुनरावृत्तिरित्यत्रेमा
२ मिहेतिविशेषणाद्देहाद्यायास्यनावृत्तिमितिस्यात्तावन्नावृत्तेरेतत्कल्पविषयत्वात्कल्पांतरेप्यनावृत्त्यावपिविशेष
णानर्थक्यान्नावित्यापरत्ताथिनिरतिशयपुरुषार्थसिद्धिः एतमेवाध्वानंपुनर्निवर्त्तंतेअन्यथावर्त्ततेपुनररतिचेद्दृ
ष्टफलस्वल्पनावगमात्तस्मान्नकर्मवशाद्दासांतिकपुरुषार्थप्राप्तिरित्यर्थः॥ एवमनघकर्मफलफलितंसंबंध
नि माहरूपसत्तूद्दीताउक्तरीत्याकर्मयतोनरतिशयपुरुषार्थहेतुरतस्तत्साधनात्कर्मणस्तत्फलाच्चविरक्तस्यनिरंनिरति
शयपुरुषार्थकांक्षतस्तत्साधनकेवलमात्मज्ञानेसंसारोनर्भत्वपूर्वैक्तगतित्रयहेतुकर्मतद्वैतनिराकरणेनवक्त
व्यमित्यभिप्रायेणोपनिषदेषारभ्यते॥ नहिकर्मानुष्ठानात्पुमर्थोनतिशयोलभ्यतेतस्यातद्यथेहेत्यादौदृष्टिफलत्व
श्रुतेस्तथाचेश्वरार्पणबुध्यानुष्ठितशुभकर्मवशादुपजातशुद्धबुद्धेर्विरक्तस्यमुमुक्षोर्मोक्षसाधनज्ञानार्थोपनि
रवु पनिषदारंभइतिहेतुंमन्त्रावः संबंधादित्यर्थः॥ नचमोक्षार्थिनःप्रवर्त्ततेतत्रकाम्यनिषिद्धयोर्नित्यनैमित्तिके
कुर्यात्स्यवापजिहासयोतिवृद्धेरक्तत्वात्काम्यनिषिद्धेवर्ज्जनीयेनित्यनैमित्तिकेचकृत्वात्रावस्थितस्यमुमु
हे क्षोर्वर्त्तमानदेहपातेपुनर्देहानारंभहेत्वभावादनायाससिद्धाज्ञानादतेविमुक्तिरितिकथंतादर्थ्येनोपनिष
दारभ्यतेतत्राहनचेति॥ नहित्वदुत्प्रेक्षितोमोक्षोपायोविनाप्रमाणेनप्रकल्प्यते॥ नचयोरुषेयवाक्यमूलप्रमाणा राम० २

मंत्तरेराप्रमाणो ॥ नचात्रश्रुतिस्मृतीप्रत्यक्षास्विामूलमालोच्यते ॥ संभवतिचयथावरोत्तचरितस्यापिकर्मशेषव
श्मादेहांतरां नच्चैकभविकः कर्माशयस्तद्यइहरमणीयचरणास्ततःशेषेणेत्यादिश्रुतिस्मृतिविरोधाच्च तस्मादात्म
ज्ञानादेवमुक्तिरितिभावः ॥ अद्वैतात्मज्ञानविधुराणांभेदज्ञानभाजांकर्मानुष्ठायिनांक्षयिफलशालि
त्वेवाक्यशेषंप्रमाणयतिवक्ष्यतिहीति ॥ अद्वैतात्मोपदेशानंतर्यमथशब्दार्थः ॥ येपुनरन्यथासितगुरवस्त
दुपदेशमन्यथामतियथोक्तादद्वैतादन्यथाद्वैतमेवतत्त्वंविदंतितेपरतंत्राःसंतोरागादिनाकर्मानुतिष्ठं
तोविनाशिफलशालिनःस्युरितिशेषस्यार्थः ॥ अद्वैतात्मज्ञानादात्यंतिकपुरुषार्थसिद्धिरित्यत्रापिवाक्यशेष
मनुकूलयतिविपर्ययेचेति ॥ चकारात्तत्क्रियापदमनुकृष्यते ॥ सहिविद्वान्विद्ययानिरस्ताविद्यादिमलःस्वप
रिज्ञानात्स्वयमेवपरमात्माभवतिभेदप्रतिपत्तिहेतोरुच्छिन्नत्वादित्यर्थः ॥ भेदनिष्ठानांकर्मिणांपुरुषार्थोनि
रतिशयोनास्त्यति अद्वैतनिष्ठानांतुकर्मसंजातपुमर्थस्सेत्स्यती त्यत्रवाक्यशेषस्थंलिंगंदर्शयतितथेत्यादि
ना ॥ द्वैतमेवविषयस्तस्मिन्व्याचारंभराश्चतेरन्तेभिसेथापस्याभिसंधास्यस्यत्वाभिमानस्तस्यबंधनेपरमा
नेरस्याविर्भावराहित्यंसंसारात्मकस्यदुःखस्यप्राप्तिश्चयथावस्तुतत्स्तात्स्कारस्यनोहेतत्स्वरोस्मीतिमिथ्येवाभिम
नामानस्यपरिशोधनार्थंतत्तपरस्पोग्रेहलोराहोबंधनंदुःखप्राप्तिश्चप्रतीयतेतथैवद्वैताभिनिवेशावत्तोयातिप्रथ

छां·भा·टी·आ
३

तु

ममुक्षावस्थतोऽनन्तरस्य परैरारोपितत्वस्कारत्वस्य परिशुद्धत्वयातत्वपरत्वम्व्यहरोदाहृघमाववतद्वैताभावोप
लक्षितं प्रत्यगात्मनि परमार्थसत्यभिमानवतो द्वैताद्वैत्याद्वैतविज्ञस्यानर्थध्वंसो निरतिशयानन्दाविर्भावश्चेति
याथार्थ्यकार्यान्तरोधेनाश्रयाति वैस्पष्टतातियोजना॥ केवलमात्मज्ञानं कैवल्यहेतुस्तत्सिद्ध्यर्थमुपनिषदारंभ इति त्व
यस्योदर्शितः॥ स्वपूर्वापरकर्मसमुच्चितं चात्मज्ञानं मोक्षसाधनं तादर्थ्येनोपनिषदारंभ इत्याहुस्तान्प्रत्याह
तएवेति॥ पतत्कृतकं ज्ञानित्यमिति व्याप्तेर्न त्वग्रहीतया तत्रैव चाध्यर्थे हेत्वादिष्कल्याकर्मफलस्यानित्यत्वावगमात्तव
ह्लविदाप्नोति परमित्यादि ... स्यात्वे ज्ञानफलस्यानित्यत्वसिद्धेर्ज्ञानकर्मणोर्विरुद्धफलत्वाध्यवसायाद
द्वैतस्यात्मनो दर्शने नैव कर्मणा सह भवितुमर्हतीति॥ नहि विरुद्धयोस्तमःप्रकाशयोः समुच्चयः संगच्छते॥ त
न्नसमुच्चितज्ञानार्थत्वेनोपनिषदारंभ इत्यर्थः॥ किंचाद्वैतात्मज्ञानं स्वमात्र्यसिध्यर्थं वा कर्मापेक्षते स्वबाधकवि
धूननार्थं वा॥ नाद्यस्तस्य साध्यफलत्वादिति मत्वा द्वितीयं प्रत्याह क्रियेति॥ वाक्यजनितस्याद्वैतात्मज्ञानस्ये
ति शेषः॥ तस्य बाधकाभावे नैत्परिहारार्थं सहकार्यपेक्षा नास्तीत्यर्थः॥ बाधकप्रत्ययाभावस्यासिद्धिमाशंकते॥ क ल
र्मेति॥ तद्विषयो विधिप्रत्ययो यजेतेत्यादिविधिजनितः कर्तृत्वभोक्तृत्वबोधः स चात्मनि कर्तृत्वादिकमाकांक्षन्नकं
चात्मज्ञानस्य बाधको भवतीत्यर्थः॥ कस्यापि कर्मविधिरत्तस्याविदुषो वेति विकल्प्याद्यं प्रत्याहानेत्यादिना॥ क राम०
३

ओघाकारं प्रमाणनिरपेक्षप्रकाशप्रसूतां मिथ्याज्ञानं द्वैतस्तेन मिथ्याज्ञानेन जानितकर्मफलविषयीरागा
द्विषस्तद्वतश्चकर्मविधीयते नहिकर्त्ता हि मिथ्यादिमिथ्याविषयो रागाद्वेषाभावे विधातुं प्राक्प्रघट्टि कुरुते जन
स्तन्तत्कामस्य चेष्टितं मि तिस्फुतेरतोऽज्ञस्यकर्मविधिपक्षेन तत्रस्यपो बाधकं प्राप्त्याभावादित्यर्थः॥ द्विती स
यं शंकते॥ अधिगंतेति अथातस्त्वाध्यायो हि वेदे हि के कर्मतो अधिक्रियते॥ अध्ययने चार्थावबोधफलमितिमीर
मांसकमर्याद्यात्तथा चाध्ययनवातो ज्ञातसर्वे वेदार्थस्यापर्यं जनेतत्स्याद्विना कर्मविधाना द्यात्मज्ञानस्यापि कर्मा
गत्वं गम्यते न चात्मज्ञानमपबाध्यतेऽविरोधादित्यर्थः॥ न तावदर्थावबोधफलमध्ययनमिति प्रामाण्यं कमस्य
तावात्तिफले तदितिवाच्येत प्रसिद्धत्वाध्ययनविधिवशेन नात्मज्ञानस्यकर्मविधिसंबंधः संभवं प्राप्तेतीति प
रिहरति नेति किंच ममैदं कर्मेति कर्मेतापेक्ष्यप्रतिपत्त्यवस्थितेः विषयी कृत्यप्रवृत्तस्य कर्त्राघाकारा विज्ञानस्यप्र
माणापेक्षामंतरेण स्वभावप्राप्तस्य वाक्योत्थेन सम्यग्ज्ञानेनापहस्तितत्वात्कर्मफलविषयरागाद्ययोगात्तन्निवेशन
स्य कर्मणो पि दुरनुष्ठानत्वान्नात्मज्ञस्य कर्मोपपत्तिरित्याह कर्माधिकृत इति। अद्वैतात्मज्ञानस्य कर्मप्रवृत्तिविरोधित्वे
फलितमुपसंहरति तस्मादिति। अज्ञस्य कर्मविधित्वात्मज्ञस्य न्यासोऽत्र प्रकृतिं संवादयति॥ अत एवेति। एते त्वपोद्या
अभिमानः कर्माधिकृता इति यावत्॥ यथा ब्रह्मचारी गृहस्थो वानप्रस्थश्चैतेकर्मिणस्तथा ब्रह्मविदपि कर्मी

त्रिप

छां॰भा॰टी॰ चेत्तत्पथक्क्रियेत तत्पृथक्करणाच्च न मुख्यकर्मविधिरिति मत्वोक्तं ब्रह्मसंस्थ्याद्यतिपरिसमुच्चयासंभवात्केवल
४ मेवात्मज्ञानं कैवल्यसाधनमिति मादंतास्थ्यनोपहारम्यते। हेतत्किमित्यस्यामुपनिषदि त्रिविधान्युपासनान्युप
न्यस्यंतेत्त्राह। तत्रेति॥ उक्तं पारस्योपनिषदं रमेसतीतियावत्। स योवायुं दिश्यं वत्सं वेद न पुत्ररोदं रोदितीत्या
दीन्यभ्युदयफलानि उपासनानि केवलानि संतिकृष्टफलं त्वंतानि कर्मसमुच्चितफलत्वेऽद्वैतान्निःप्रपंचादोष
द्विकृतं सगुणं ब्रह्म। कर्मसमृद्धिफलानि कर्मफलगतातिशयफलान्युद्गीथाद्युपासनानीत्यर्थः॥ आत्मवि
द्याप्रकरणोक्तविधिविधीयासनोपन्यासे हेतुमाह रहस्येति उपनिषत्सरवेदनीयत्वस्यात्मविद्यायामुपासनेषु चावि
शेषादित्यर्थः॥ तत्रैव हेत्वंतरमुद्राव्यविमज्जतेमनोरंजीत्यादिना॥ आत्मज्ञानस्योपासनानां च यथोक्तं
सामान्यमिष्यते चेत्तर्हि फलतोऽपि विशेषो न स्यादिति मन्वानः शंकते कस्तर्हीति॥ फलतो विशेषं दर्शयन्नुत्तर
माह उच्यत इति॥ तत्र प्रथममात्मज्ञानस्योपासनाभ्यो विशेषमादर्शयति स्वाभाविकस्येति प्रत्यगात्मनि क्रिया
कारकफलविभागविक [ ] ल्पकूटस्थे स्वभाव इत्याविद्यातो विद्याकृतेन स्थ्या [ ] पितं कर्तृत्वाद्याकारविज्ञानं तत्स्या
द्वितीयत्वादिलक्षणाधिष्ठानयाथात्म्यज्ञानेन निवर्तकं यथा रज्ज्वाद्यधिष्ठानतत्त्वादिसमारोपरूपस्य मिथ्या
ज्ञानस्य प्रकाशादिकारणप्रसूतो रज्ज्वाद्यधिष्ठानस्वरूपनिश्चयो निवर्तकस्तद्वदित्यर्थः॥ संप्रत्युपासनानामद्वैत रामः
४

रो

ज्ञानाद्विशेषं दर्शयति उपासनेष्विति ॥ यथा मनो ब्रह्मेत्युपासीतेत्यादि ॥ किं चित्तालंबनं मनःप्रभृति विवक्षितं
समानज्ञानीयप्रत्ययसंतानकरणं विच्छिद्यविच्छिद्यव्यापिनोपि सिध्यती विच्छिन्नधि ॥ तद्विलक्षणोति ॥ आत्मज्ञा
नां नस्योपासनांच अवांतराविशेषमुपसंहरति इति ॥ विशेष इति ॥ ननु विद्याप्रकरणे यथोक्तोपासनामुपदेशात्
मवेपि विद्येव प्राधान्यात्प्राथम्येनोच्यतामुपासनानि पुनरप्रधानत्वात्तत्पश्चात्त्वेन वाच्यानीत्याशंक्या
हृतानीति ॥ उपासनानामीश्वरार्पणात्तु ध्यानुष्ठितनित्यादिकर्मवच्चित्तशुद्धिद्वारा ज्ञानकारणत्वात्कार्यापेक्षया का
रणस्य प्राथम्यप्रसिद्धेः साकारवस्तुविषयत्वेन सुसाध्यत्वाच्च मंदानां सहसा तेषु प्रवृत्त्युपपत्तेरादावुपदेशः सं
भवतीत्यर्थः ॥ तथापि बहुविधेषु उपासनेषु किमि संगावबद्धमेवोपासनं प्रथममुच्यते तत्राह तत्वेति ॥ प्रा
क्तने पुरुषे कर्माभ्यासस्यानादिवासनया रूढीकृतत्वादभ्यस्ततत्कर्मत्यागेऽत्यंतं खिन्ने केवलोपासने चेत
स्समर्पणाद्दुःखं कर्माभिसंगावबद्धमेव तावदुपासनमुच्यते ॥ एवमादावुक्त्वा पुनरुपासनांतराति क्रमेण
वक्ष्यंतीत्यर्थः ॥ कांडद्वयस्य नियतपौर्वापर्यप्रयुक्तसंबंधमुपनिषत्तात्पर्यं चोक्त्वा प्रत्यक्षरं व्याख्यातुका
मः प्रतीकमादत्ते ॥ ॐमित्येतदक्षरमिति ॥ तत्र प्रथममोंकारस्याभिधायकत्वपक्षमेवावलंबते परमात्मन इति
अभिधानांतरेभ्यो विशेषं दर्शयति ॥ नेदिष्ठमिति ॥ निकटतममिति प्रायेण प्रियमितियावत् ॥ ॐकारस्य नेदिष्ठ

छांभा॰टी॰आ त्वं समर्थयते। तस्मिन्निति। ॐकारस्यान्यत्र परमात्मनामत्वेपि प्रकृते किं विवक्षितमित्याशंक्याह तदिहेति॥
५ प्रकृते हि वाक्ये तदोमितिपदमिति शब्दश्रोतस्कं प्रयुक्तमिति शब्दसामर्थ्यादेव वाचकत्वाद्यावर्त्य तत्शब्दस्व
रूपमात्रेमुपास्यं गम्यते॥ पत्रेहीतिपरःप्रयोगो न तत्राभिधेयविवक्षा हि पृथ्वी गोरित्यस्य माहेति। तथा चात्रेतिप
रत्वादोंकारस्य स्वरूपमात्रमुपास्यं विवक्षितमित्यर्थः॥ तस्योपास्यत्वार्थं श्रेष्ठं साधयति। तत्याचेति। इतिपदप्र
योगवशादभिधायकत्वाभावे तस्य चोशब्दितप्रतिमायामगवत्प्रतीकत्वं होंकारस्यापि परमात्मप्रतीकत्वेन व
श्रेष्ठत्वादुपास्यत्वमिति द्विरित्यर्थः॥ तदीयं श्रेष्ठं समप्रमाणकं निगमयत्येवमिति॥ सर्वे वेदा इत्येतदालंबनं श्रे व
ष्ठमेतदालंबनं परमित्यादिश्रुतिः॥ किंचनास्य श्रेष्ठत्वं समर्थनीयं प्रसिद्धत्वादित्याह जपेति॥ गायत्र्यादिजपे यज्ञादौ
कर्मणि स्वाध्यायस्यादौ चांते चोंकारस्य प्रयोगो दृश्यते॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः॥ प्रवर्तन्ते वि
धानोक्ताः सततं ब्रह्मवादिनां॥ ब्राह्मणः प्रणवं कुर्यादादावंते च सर्वदा॥ स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यत दा
इति स्मृतेः॥ ॐमितिब्राह्मणः प्रवक्ष्यन्नाहेत्यादिश्रुतेश्चेत्यर्थः॥ ॐमितीसपं भागो व्याख्यातः॥ संप्रत्येतदक्षर
मित्यस्यार्थमाहातदिति॥ श्रेष्ठत्वयास्यत्वार्थमनुकृष्यते॥ व्याप्तेश्च समंजसमिति॥ न्यायेन विशेषणस्यार्थवत्त्वम
भिप्रेत्य रूढियोगमपहरतीति न्यायेनाक्षरशब्दस्य प्रकरणमनुसृत्य प्रसिद्धमर्थमाह वर्णात्मकमिति॥ आमोद राम॰
५

तू प्रे

ग्रहस्य द्रोणस्य इतिवदेकदेशे समस्तस्य विषयं प्रदर्श्य प्रयुक्तमित्याहोद्गीथेति ॥ उपास्तिविमज्ञातो कर्मोद्गी
थावयवत्वादोंकारे तद्भ्रम्प्रयुक्तिरस्युक्तं त्वादनंतरवाक्यमिके विधिरुक्तमित्याशंक्याह तदुक्तो योऽस्म
ङ्क्ते हेतुस्तेन स्फुटीक्रियते तत्रैवोक्तं ध्याम्यामि दर्शितरूपस्यमित्याह । स्वपमेवेति ॥ ओमित्येतदक्षरमित्य
त्रोपासनोत्पत्तिविधिरुक्तः ॥ सं प्रति गुणो विवक्षवो कान्तरमादाय व्याचष्टे तस्येति ॥ एवमुपासनमितिर
सतमत्वमादिः सम्पद्गुरिस्येवं गुणाकमुपासनेयुपासरस्य तत्तत्थेत्यर्थः ॥ एवं विमुक्ता तियरमः परात्मं
धी त्वेनेयं त्रयीविधावर्त्तते इत्याहोद्गीथविमुक्ता तिरुक्ता तियस्यत्तत्थेतियांवत ॥ एवं फलमित्याय वित्ताहवैका
मानामित्यादियफलेय स्योयास्यसाक्षात्कारस्य ततत्थोक्तमित्यर्थः ॥ गोदोहनवदाश्रित्स्य विधानार
गेव१५ थिक्रुताधिकारमिदमुयासंनेतथापि यथं घ्यप्रातिबिम्बफलामिति न्यायेन फलवत्फले याजमानमुद्र
तुपे जमानेन कर्मार्थे क्रीतत्वात्तत्कर्तृकस्योपासनस्यापि यजमानस्यांस्वामिः फलमिति विवचनमाद्दिशब्दा नः
र्थः वाक्यस्यसाकांक्षत्वेनानर्थं संचारयति प्रवर्त्तंतेत्तेतरुत्तातित्त्वैचोपव्याख्यानमनुवर्त्तयन्नोंकारस्यर
सतमत्वं गुणो विधात्तयातनिकांकरोति ॥ एषामिति ॥ गतिरिस्युक्ति कारणात्त्वेपरायत्तामितिहि तिहेतुत्व

छां॰भा॰टी॰भा
६

त

मवष्टंभ इति प्रलयनिदानत्वमुच्यत इति भेदः । वैपरीत्येन चामूनि पदानि नेयानि । अपां पृथिवीरसत्वं साध-
यत्यप्सु हीति ॥ अस्यार्थस्य श्रुत्यैव प्रसिद्धिं द्योतयितुं हि शब्दः ॥ ओषधीनामपः प्रति कारणत्वाभावात्कथं
तत्र रसशब्दस्तत्राह ॥ अप्परिणामत्वादिति ॥ कारणतापरत्वस्याप्यर्थं च व्याख्यातोपि रसशब्दो गौरस इतिव-
दुत्तरत्र कार्यपरतया व्याख्येय इत्यर्थः ॥ कथमोषधीनां पुरुषो रसो नहि ताभिरसौ क्रियते तत्राह । अन्नेति ।
पुरुषरसत्वं वाचः समर्थयते पुरुषेति । वाग्विहीने हि प्रेते पुरुषांतरं वै विनिंदति । अतो वाचः सारतमत्वं प्र-
सिद्धमिति हि शब्दार्थः । तस्याः सारिष्ठत्वप्रसिद्धिरतः शब्दार्थः । वाङ्निर्वर्त्यत्वादृचस्तद्रसत्वमित्यभिप्रे-
त्याह । सारतरेति । ऋचः सकाशादपि तदध्यूढं साम गीयमानं वक्तृश्रोत्रोः सुखकरमिति मत्वाह सारत-
रमिति । उद्गीथशब्दं चावयवे प्रकरणान्नियमयति प्रकृतत्वादिति । न हि सामान्योक्तं फलाय भवतीति
मन्वानोक्तं ते सारतर इति ॥ पुरुषार्थं पृथिव्यादीनां रसत्वमुक्तं तदिदानीं दर्शयति स एष इति । रसतमः स्वर्-
गाके मोक्षोरूपस्य स्वार्थे विशेषणमुभ्यां महीकरोति । परम इति । तस्य परमात्मस्थानयोग्यत्वं सम-
र्थयते ॥ परमात्मवदिति । यथा परमात्मा स्वरूपत्वेनानुसंधीयते तथास्यापि तदात्मनानुसंधेयत्वा-
द्विष्णुवदालंबनार्हं प्रतिमावदयमपि परमात्मवदालंबनयोग्यो भवतीत्यर्थः ॥ ओंकारस्य प्राचीनोर

राम०
६

सोनास्तीतितृतीयसत्तमत्वस्फुटीकरणार्थंपरिगणनान्नातःसिद्धमष्टमत्वमनुवदति।अष्टमइति।ननुमुक्तानुसार
भूपनत्वमत्वेप्रतीयमानेकथमोंकारस्याष्टमत्वप्रतिज्ञायतेतत्राह।पृथिव्यादीति।सएषइत्युक्तेयत्नोकर्तव्ये
यंउद्गीथइत्येतदाचष्टे॥यदुद्गीथइति।पूर्ववदुद्गीथशब्दोवयवपरोनेतव्यः।अथगुणान्तरविधानार्थंप्रश्न
मवतारयन्नुक्तमनुद्रवति॥वाचइति।ऋचःसामरसःसाम्नउद्गीथोरसइतिचोक्तमितिद्रष्टव्यं॥इदानीमृ
गादिजातिजिज्ञासमानःपृच्छति॥कतमेति।वीप्साचैवंप्रश्नेतत्तज्जातिर्ज्ञानेच्छाद्योतिरुक्तंदर्शयितुमित्याह
कतमाकतमेतीति॥प्रश्नत्रयमाक्षिपति।नन्विति।अनेकजात्यवच्छिन्नानांमध्येयदैकस्याजातेर्निर्द्धा
रणार्थःपरिप्रश्नोभवतितदातस्मिन्विषयेविकल्पेनडतमच्प्रत्ययःस्याद्यथाबहूनांकठादीनांमध्येकठ
जातिनिर्णयार्थंकतमेकठइतिप्रश्नोदृश्यतेतथान्यत्रापीतिसूत्रार्थः।बहूनामेकस्याःनिर्द्धारणेडतमजि
धानेपिप्रकृतेप्रश्नत्रयेकानुपपत्तिरित्याशंक्याहनहीति।अत्रेत्यपव्यापकाध्येतृव्यवहारमभिरुक्ताकेऋक्
जातिग्रहणांसामजातेरुद्गीथजातेश्चोपलक्षणं।तद्बहुत्वाभावेपिकिंतःक्षिपतेतत्राह।कथमितिऋगादि
जातग्रोपरिभूयस्याःस्पष्टत्वात्।सामध्येकतमर्ग्जातिःसामजातिर्वाकतमावोद्गीथेजातिरत्रविवक्षितेति
प्रश्नेपुतेनचास्तितत्रजातिबहुत्वप्रमाणाभावादतोनुपपन्नंप्रश्नत्रयमित्यर्थः॥प्रश्नानुपपत्तिंदूषय

ज्य

छ्वो·भा·टी·आ ति। नैष दोष इति। बहूनां तत्तज्जात्यवच्छिन्नानां सन्निधाने जातौ सत्यां व्यक्तिबहुत्वसंभवात्तदन्यतमतानिर्द्धा
१ रणार्थपरिप्रश्ने विकल्पेन डतमजिति सूत्रार्थो गाकारादृगादिजातौ तद्व्यक्तिबाहुल्यात्कतमा तद्व्यक्तिर्वा चश्र
त्रसङ्ख्या ह्यो विवक्षितेति प्रश्नस्यार्थवत्तानाऽनुपपन्ने प्रश्ने चैषमित्यर्थः। यन्नु विग्रहान्तरं गृहीत्वा प्रश्नानुपपत्तिरि
त्युक्तं तत्राह। नत्विति। तत्र चानुपपत्तिं परिजातेरित्यपत्र्यक्नीकरिष्यति। अव्रीहिविग्रहापरिग्रहे द्वेतिकारापन्न स
दाहरणां किं स्यात्ते कठप्रादस्य व्यक्तिविशेषस्याभावादिति शंकते। नन्विति। उदाहरणोपिसत्यां कठजा
तौ तद्व्यक्तिबाहुल्यात्तदन्यतमनिर्द्धारणाभिप्रायेणापरिप्रश्ने डतमजित्संगाकारान्तपरोक्तोदाहरणाविरो
धोऽस्मत्पक्षेऽस्तीति परिहरति तत्रापीति। नन्वद्विधापि विग्रहोपपत्तौ किंति। त्वदिष्टो विग्रहो नियम्यते तत्राह। प
दाति। त्वदिष्टविग्रहपरिग्रहस्त्वेदृगादिजातेरेकत्वात्प्रश्ने कंवहुत्वापोगाद्बहूनामित्यादिसूत्रेणाकतम
कृतमत्तुसामेदुदाहरणां न सिध्येत् तथा च तत्तिव्यर्थपर्यन्विधानंप्रसज्येत न हि वेदिकमुदाहरणाप्रमत्तया
तामिवहीतंशाकातस्मात् दृगादिव्यक्तिरेवात्र प्रश्नप्रयुक्तेत्यर्थः॥ किमिति पश्योक्तरीत्याविमृश्यते विवक्षितम्या
रू दित्यपमेवादावुपन्यस्तं लाघवादित्याशंक्याह विमर्शो हीति। शिष्यमनयाश्रात्[illegible]त्यर्थः॥ कि स्याचोदिते
सैवाचायैर्मतापरिहरतिवागेवेति नन्वौचेप्रतिवचने वागन्वोरेकत्वावगमाद्दोकारस्यपरस्ततमवाकोपरिष्ठ एम०
१

दृ म ६

मत्त्वंव्याहन्येत्तेत्याशंक्याह वागर्थावितिकथंपुनर्द्वैतमवाक्यादिप्रश्नप्रतिवचनरूपवाक्यंमिघतेऽर्थाभि
धानाभावान्नत्राहाप्ताविति पूर्वंहिवाक्यमोंकारस्यपरसत्तमत्वं विरुध्यतिरंदंतत्तस्यैवाप्तिगुणाविधत्तेतथाचतादृगु
णाविर्थ्यंर्थत्वेनास्यवाक्यांतरत्वादेतद्वाक्यवशात् दृष्टतमत्वाभावेपिपूर्ववाक्याद्वोंकारस्याष्टतमत्वमविरुद्धमित्य
ती र्थः॥तथापिकथमृगादितीजोपिएष्वेवागेवर्गिस्यादिप्रतिवचनमुचितंतेतद्याक्तिविशेषवचनमेवप्रश्नान्तसा
रास्याशंक्याहवाक्प्राणाविति॥वागर्थौयोनिस्तत्रिविधंर्नैकत्वात्प्राणाश्चसाम्नोहेतुर्बलेनहिगीतिस्याघतेतत रू
थावागेवेसाहिनाकार्यकारणयोरभेदोपदेशादृष्टान्तेसाममात्रेवातत्स्वकारणात्मकंप्रतीयतेतेनपूर्वत्रा
पिर्यक्तिरविवक्षितापृश्नप्रतिवचनपरिकार्थत्वान्तच्चैवमृगादिजातेरेकत्वाङ्तमचप्रत्ययान्वयतित्त
त्रजातस्यवद्धित्ता नामुक्तामोङ्गाध्यानांसान्निध्यादृगादिजातेरेकस्यानिर्धारणार्थपरिप्रश्नेतत्प्रयोगसंभवा
दृगादिषुप्रत्येकंभेदविवक्षयाषष्ठीसमासेहृषताम्रुक्तंतत्रप्रत्येकमेकत्वमपेक्ष्योक्तास्यांषष्ठीसमासेतुनाकं
चित्तद्दृष्यतीतिभावः॥ऋगात्मिकायावाचंसामात्मकस्यप्राणस्यग्रहणतोफलितदर्शापिन्तुक्रमेवव्यक्तोकरो
तिपथाक्रममिति॥अवतामभात्रावरोधेपिकिंसिध्यतीत्याशंक्याह॥सर्वेतितथापिकिंस्यादितिचेत्तत्राह॥सर्वेका
मादतिद्वत्का[redacted]प्रक्रियायासर्वकामावाप्तिहेतुरोंकारोविवक्षितात्प्तिगुणकःसिध्यती

छां॰भा॰टी॰ त्यर्थः॥ तत्रापि प्रतिवचनेनात्पर्यमाह। ओमिति। ओमित्येतदिति। अत्रापि पूर्ववज्जातिग्रहीतोत व्यक्तित्वेन मात्रिरेवोक्ते
८ तिशंकां निरसितुमोमित्येतदक्षरमिति विशेषणं। तथा चोद्गीथस्तदवयवो विशेषणात् प्रकरणाच्चेत्यर्थः॥ पारंप
र्येणावाक्प्राणयोः सर्वकामसंबंधमाह उद्गीथस्यापि तथाभूतवागादिसंबंधादस्ति सर्वकामसंबंध इत्युक्ते
रिदानीमोंकारस्य वाक्प्राणद्वारा सर्वकामसंबंधे हेत्वंतरमाह। तद्वा इति। तदेतस्य द्वयोरक्षरविषयत्वं वा
वर्त्त्यवक्ष्यमाणविषयत्वं दर्शयति॥ मिथुनमिति। वेशब्दो मिथुनप्रसिद्ध्यर्थः॥ वाक्प्राणाविति पदद्वय
नू मयमुपलभ्यते तं मिथुनमिति योजना। संगोक्तस्य वाक्यार्थमाह॥ ओंकारमेति। वाक्प्राणयोरभिव्यक्तिमका
रणत्वमुत्तरवाक्येन स्पष्टयति॥ ओंकृतिपथा वाक्यार्थौ मिथुनमेवेमुक्तमेवेच्छया तं ओरता मिथुनं निर्दे
शसामान्योदिच्छाशंक्याह नत्विति। विपक्षे दोषमाहान्यथेति। इष्टमेव मिथुनद्वयमिति चेन्नेत्याह। तथा
चेति। नतु मिथुनयोरन्तरं मिथुनत्वमाद्यपेक्षवचनमुपपद्यतस्य तेने त्याधकर्णयन्मंगान्तत्वंतं त्वं मिथुन
द्वयमस्तीत्यर्थः॥ भवतु वा क्वाप्राणाख्यमुक्तमात्मक वाक्प्राणरूपं ओंकारं मिथुनयोः संसर्गे किं फलं तत्रा
तस्य हा एवमिति। कपापुनर्विधया मिथुनेनैष संसृष्टमक्षरस्य सेतीत्यत्राह। वाङ्मयत्वमिति पन्तु सर्वकामापि
गुणविशिष्टमिथुनमित्युक्तं तदुपपादयति मिथुनस्येति। प्राप्तिद्वमिति तादृग्गर्थो पथ्योक्ताक्षरस्य सर्वकामा रामः ८

ति तद्धर्मेत्युपासकस्याप्तिगुणविशिष्टस्योक्तिः ८ आप्तेति वक्तव्ये कथमापयितेत्युक्तं तत्राह य
जमानस्येति निपातौ त्व धारणार्थौ उक्तौ पं ८

ति

प पितृत्वेदृष्टोऽन्तःसन्नुच्यते ऽनेनत्वाकोनेसंबंधः॥ दृष्टांतमेव विवृणोति प यथेत्यादिना॥ मिथुनद्वयेनास्तीत्युक्तत्वा
त्कथंमिथुनावितिद्विवचनं तत्राह मिथुनावयवाविति॥ ग्राम्यधर्मेत्ति यातथाविधव्यापारतयेत्यावत्॥ वैश्र
ब्दोवधारणे॥ विवक्षितं दृष्टांतिकमाचष्टे॥ तथेति॥ एवमोंकारमाप्तिगुणविशिष्टं विद्वांस्तदुपासनाफलं कथ
यति तदुपासकोऽपीत्यर्थः तदवयवभूतमिति यावत्॥ आप्तिगुणवदोंकारोपासनात्कथमुपासितुस्तद्गुणो भवती
त्याशंक्याह तमिति॥ उक्तश्रुत्यर्थस्य गुणोपत्तरवधानेतास्यापेदृष्टोपतिसमृद्धीति तस्य समृद्धिगुणवत्वमप्रामाणिकमि
त्याशंक्य परिहरति कथमित्यादिना॥ तदेतत्सदृशयोरोंकारात्मकमक्षरं विषयत्वेन निर्दिशति प्रकृतमिति तस्य सम्बन्धार्थो
ऽयं शब्दः॥ अनुज्ञाक्षरमित्योंकारविशेषणं विवक्षितेनार्थेन घटयति प यद्धीत्यनुज्ञा चेति तस्यानुज्ञात्वे प्रश्नपूर्वकं प्रसिद्धिमुप
न्यस्यति कथमितीति तत्रे तिशिष्टानयनयो गिरिः॥ तदिदमनुमतं यं साधारणरूपेणोच्यते॥ ॐकारस्यानुज्ञाक्षरत्वे लोकप्रसि
द्धिंवदेप्रसिद्धिं समुच्चिनोति तथाचेति कतिदेवायाज्ञवल्क्येति शाकल्येन पृष्टे त्रयस्त्रिंशदिति याज्ञवल्क्येन प्रत्यु
क्तेसत्योमिति शाकल्योनुज्ञां कृतवान् पुनश्च कत्येवेति प्रश्ने षडिति प्रतिवचने सत्योमिति हो वाचेत्यादि वा सहे हुड्
रणके यथोक्तार्थानुसार प्रसिद्धिमित्यर्थः॥ पद्धिं किंचेत्यादावुक्तो लोकप्रसिद्धिमेव प्रकटयति तथा च लोकेऽपीति हो
वाचेत्या(दि) ॐकारस्य लोकवेदप्रसिद्धिमनुज्ञात्वेऽपि कथं समृद्धिगुणकत्वमित्याशंक्याह तदिति॥ तथा ह्योप्य

छां॰भा॰टी॰अ॰
१

र्थः समृद्धिप्राचुर्यादुपरिसंवक्ष्यते। तस्याः समृद्धिमूलत्वं ख्यापयति। समृद्धो हीति। अनुज्ञायाः समृद्धिं प्रतिकारणत्वेन
समृद्धित्वे तस्योंकारस्यापि तदात्मकस्य समृद्धिगुणवत्त्वं सिद्धमित्युपसंहरति। तस्मादिति॥ समर्द्धयितेत्यादिफलवा
क्यं प्रत्याह समृद्धातीति। अस्मिन्वाक्ये समर्द्धयितेत्यादिपदजातमापयितेत्यादिपूर्ववाक्यवद्व्याख्येयमित्याह इत्यादिपूर्व
वदिति॥ ॐकारस्य गुणान्तरपवतः सफलमुपासनमुक्तं तथा च वक्तव्याभावात्तेनेयमित्यादिवाक्यमनर्थकमि
त्याशंक्याहाथेति स्तुतेरानर्थक्यमाशंक्याहोपास्यत्वादिति॥ प्ररोचनं प्रश्नपूर्वकं प्रकटयति। कथमित्यादिना त्र
यीविद्यावर्त्तत इति संबंधः॥ त्रयीविद्येत्यस्याप्यचरितार्थत्वं कथयति॥ त्रयीविद्येति। किमितिष्कृतं तत्स्वाव्याख्या
पतेनत्राह नहीति। तस्याश्च स्वरूपलाभस्यानादित्वेन हेत्वनपेक्षत्वादित्यर्थः। कर्मापि कथमात्मावरणादिभिरात्मा
नं लभते तत्राह कर्म त्विति। प्रसिद्धिमेव प्रपंचयति कथमित्यादिना अध्वर्युर्होत्रोद्गात्रसमाहारस्य दर्शपूर्ण
मासादिषु संभवादग्निहोमादिषु चासंभवाज्जात्रित उपसमाहाराल्लिंगाद्धोंकारेण प्रवर्त्तमानं त्रयीविहितं कर्म
सोमयाग इति प्रतिभातीत्याह। लिंगाच्चेति। सवस्यानोक्तं कर्मेति न्यायाद्धोंकारेण वैदिकस्य कर्मणः स्थितिरि
ति स्तुतिविध्यापत्त्यंतरमाह तच्चेति कथं पुनरक्षरं कर्मणा पूज्यते तत्राह परमात्मेति तत्प्रतीकत्वे किं स्यादित्येवं तद्दा
हात इत्युपचितिरिति॥ ननु कर्मणा परमात्मा चेद्धाराध्यते तर्हि तत्प्रतीकत्वादक्षरस्यापि तेनार्थवत्त्वं स्यात्तन्न चेष्यस्ते

तश्रा
राम॰
९

रा ति

नाराध्यत इति प्रमाणमस्ति तत्राह। स्वकर्मणेति। वर्णाश्रमविहितेन कर्मणेश्वरं प्रसाद्य तत्प्रसादवशात्तत्फलं कर्त्ता
प्राप्नोतीति भगवतोक्तत्वादीश्वरपूजार्थं कर्मेति कर्मकर्मेति गम्यते। तथा च तत्प्रतीकत्वादीश्वरस्य तत्पूजार्थं कर्मेति
युक्तमित्यर्थः॥ वैदिकं कर्मेश्वरपूजार्थमित्यत्र स्मृत्यन्तरं स्मृत्वा विधान्तरेण स्तौति किं चेति यजमानादीन्सादिपूर्वेण पत्न्या गृह्य
ते॥ प्राणेष्वपि विहितं कर्मैव वर्त्तत इति संबंधः॥ उक्तं सेतरमाह। तत्रेति यथाक्षरविकारे यजमानादिप्राणे वैदिकं कर्मैव
वर्त्तते तथेति यावत्। हविषे स्यत्रापि पूर्ववदन्वयः। कथमग्न्यादिप्राणानां हविषश्चाक्षरविकारत्वमत आह यागे
ति। आदिशब्देनोक्तवैदिककर्मसंग्रहार्थः॥ तस्माद्देवमित्युदाहृत्य तत्पादिस्मृतेरित्यर्थः॥ अग्नौ प्रास्ताहुतिः सम्यगा
दित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मृतिमाश्रित्याहोत्त्वेति तद्व्याहारौश्रद्धेनान्नस्य प्रजानां लादि
चौपल्पुपकरणां सर्वमुच्यते। तथापि कथमेतस्यैवाक्षरस्य तद्विकल्पस्यादित्याह प्राणेति। अक्षरस्योक्तस्य महीकृ
तत्वादुपासने सिद्धे किमन्तरेण ग्रंथेनेत्याशंक्याह तत्रेति पूर्वस्मिन्संदर्भे स्थितिवशादक्षरविज्ञाने कर्त्तव्ये तन्निष्पादक
मेतद्विज्ञानवतोनुष्ठेयमिति स्थितं तत्संक्षेपतमुत्तरवाक्यमित्यर्थः॥ आक्षेपाक्षराणि व्याचष्टे तेनेत्यादिना। ननु कर्म
कर्तृत्वे विद्वदविदुषोर्विज्ञानेन तत्फलमश्नुते नाविद्वानिति कथमित्याशंक्याह तपोश्रेति। इति शब्दस्त्वाक्षिपतीत्यने
न संबध्यते। कथं विद्वदविदुषोरविशिष्टफलमित्याशंक्य दृष्टांतमाह दृष्टं हीति। विमतेन स्वतंत्रफलमगत्तानत्वाद्य

उपावेस्पृत्याद्विति प्राप्ते प्रत्याह नैवमिति। हेतुत्वेनावतारितेवाकर्म्माव्यक्तेभिन्नेहाति। विद्योपासनाकर्मविद्या। तत्प्रयो
भिन्नत्वंप्रथक्फलवत्त्वंतन्न विद्यावैयर्थ्यमित्यर्थः॥ विद्यायाःस्वतंत्रफलवत्त्वेनास्तीतिपक्षस्यव्याहृतत्वप्रका
रमेवप्रपंचयति॥ नेमावित्या॥ ओंकारज्ञानादुभावपिरक्षरज्ञानस्याविशेषफलितमाह तस्मादिति। दिंगकर्मांगमुद्गीथमा
त्रंतंतस्माहाक्षिव्याहिष्विद्याक्षरज्ञानस्येतियावत्। पन्त्कपुनरुक्तं तयोश्चकर्मसामर्थ्यादेवफलस्यादितितत्राह
दृष्टंहीति॥ पत्त्वंगज्ञानत्वादितित्वकिमंगत्वेसतिज्ञानत्वं किंवाश्रितस्यविहितत्वमथवाएतदेवज्ञानत्वविशेष
णेनाधस्तान्निद्धरणानियमन्यायेनासिद्धेर्नद्वितीयोगोदोहनेव्यभिचारात्॥ नन्वतोपिदृष्टांतस्यसाधनविकल
त्वाहाउपावेक्षराणस्याश्रितस्यविधुदाहरणाबहिर्भूतत्वात् अंगसंबंधज्ञानत्वमात्रेणादृष्टांतत्वेसत्वंगत्वोपाधेःसंभ
वादित्यज्ञानाविशेषफलाधिकामित्यत्रानेनतत्रवाक्यंयोजयातितस्मादिति॥ विज्ञानमुद्गीथाद्यंगमात्रविषयमुपासना
तिरिक्तंतेनेतियावत्॥ योगोदेवतादिविषयमुपासनं। इतिशब्दस्तदर्थसमाप्त्यर्थः॥ तत्रैवार्थासिद्धमर्थंकथयति
विद्धदितिनन्वर्थीसमर्थोविद्वानपर्युदस्तश्चकर्म्मण्यधिकारीस्यगाकारादविदुषस्तत्रैवस्वराणानोकांतस्यानाधि
कारात्कथंतत्कर्म्मवीर्यवदितिप्राप्तितत्राह तत्राहनचेति॥ औषस्त्येकषास्तितंवेधौमच्चीहि। तेधिष्यादितस्मिन्नयंथ
जानेविद्याहीनानामपिकर्मानुष्ठानंदृष्टमतेप्रस्तोतर्यादेवतेत्याहोतोचेद्विद्वानस्यादितिलिगात्तस्मादाविडयोप

कर्मतापविकारोऽविकारिलक्षणो तु ज्ञानाभावेपि दृष्टादिज्ञानमात्रे तद्विशेषणासिद्धिरित्यर्थः॥ गुणस्तावद
क्षरं तानं स्वतंत्रस्वफलमित्युक्तं तत्र रसतमगुणावदक्षरविषयमेकमुपासनं तत्र च विद्युद्देशो फलस्यापि
तत्वेपि विश्वजिन्न्यायेन वा तत्कल्प्यते॥ आदित्यगुणावतस्तमन्द्विगुणावतस्त्राक्षरस्य द्वे विज्ञाने प्रत्येकं फलश्रुते
स्तथा चात्र त्रीण्युपासनानि पृथक्फलानि विवक्षितानीत्यत्राभिहारस्तत्तमेति॥ न तावद्देहोपासीतेति विधिव्य
तिरेकेण मध्ये विध्यंतरमुपलभ्यते। न चापार्यंताहवैकामानामित्यादियाकेफलश्रुत्या विधिरुन्नेयो रसतमगुणा
वदक्षरविज्ञानावयौ फलाकांक्षितापर्थवादस्थफलांशान्वयेनानेकगुणावदेकविज्ञानविधिसंभवे विधि
भेदकल्पनायोगान्नोत्कल्प्यार्थवादिकफलवदनेकविशेषणाकेकोपासनविषयविध्युपगमेन वाक्यैक्यसं
भवेवाक्यभेदस्यानुचितं॥ एतेन विश्वजिन्न्यायो निरस्तो रात्रिसत्रन्यायापत्तिप्रकृताविरोधादिति भावः॥ तस्योपव्याख्या
नमित्युक्तस्योपसंहारवाक्यं खल्वेतस्येत्यादि तत्वेतच्छब्देन प्रकृताकर्षणो काररसामाहाने केति॥ रसतमाप्तिसमृद्धि
रूपाण्यनेकानि विशेषणानि तैर्विशिष्टत्वेनाक्षरस्यानेकप्रकारतयोपास्यत्वात्॥ प्रकारभेदेप्युपासनैकस्यप्रागेवो
क्तत्वात्प्रकृतस्यैवाक्षरस्येतदुपव्याख्यानेपतत्खल्वविहितमित्यर्थः॥ गुणत्रयविशिष्टमुद्गीथावयवभूतमोंकारा
ख्यमक्षरं परमात्मप्रतीकं तदुध्योपास्यामित्युपदिष्टमिदानीं तस्यैवाक्षरस्याध्यात्माधिदैवभेदेनादित्यप्राणादृष्ट्योप

श्री·भा·टी·अ· सनंतविवक्षनकंडिकोत्तरमवतारयति देवासुरा इति॥ तत्राक्षराणां व्याचिख्यासुरप्रतिमाद्युदासार्थं विवक्षि
११ तं समासं दर्शयति। देवा इति॥ देवशब्दनिष्पत्तिप्रकारं सूचयति दीव्यन्तीति दीव्यतिर्द्योतनार्थो दिवुक्री
डाविजिगीषाव्यवहारद्युतिस्तुतिकांतिगतिषु इति दर्शनात् तस्य चाजंतस्य सति गुणे कर्त्तरि पचाद्यचि रूप
सिद्धिरित्यर्थः॥ ते चोत्तरकांडे वाङ्कृद्धादयो भविष्यंतीत्याशयेनाह। शास्त्रेति॥ इदं चाध्यात्ममित्युपसंहारवि
रोधात्प्रसिद्धदेवहेयत्वादुपासकशरीरस्थकरणग्रावस्था देवास्तत्वात्मकाः शास्त्रानुसारिणो देवशब्द
वाच्या इत्यर्थः॥ तथाध्यात्मं असुराविरोचनादयः स्युरित्याशंक्य पूर्ववदुपसंहारविरोधमभिप्रेत्याह
असुरा इति। असुराः इंद्रियवृत्तय एवेति सेवंधः॥ सात्त्विकेंद्रियवृत्तिभ्यो वैपरीत्यं तासामसुरत्वसिध्यर्थं
दर्शयति तद्विपरीता इति॥ तासामसुरशब्दवाच्यत्वे निमित्तांतरमाह। स्वेष्वेवेति। विद्यग्विषयासु विषंचो
नानागतयो विषयायासां तास्विति यावत्॥ प्राणनक्रियासु जीवनानुकूलप्राणचेष्टास्वित्यर्थः। तद्देवसु
रपतिस्वाभाविकमिति॥ शास्त्रापेक्षामंतरेणोवस्वभाववशात्प्रवर्त्तमानत्वे स्वाभाविकत्वं तथा च शास्त्रा
पेंद्रियवृत्तिभ्यो वैपरीत्यं सामसुरतामतिविशिदमित्यर्थः॥ वैपरीत्ये तरमाह तम आत्मिका इति॥ कथं मिथो वि
षयापहारनिमित्ताकृतस्य देवानामसुराणां संग्रामो भूदित्यपेक्षायामंतरीहत्तिप्रकथयति शास्त्रीयेति॥ दे राम·
११

वीवृत्तिं प्रथयति तत्र थेति॥ देवानामसुराश्चासुरवैपरीत्यं स्फुटयति शास्त्रेति॥ स्वाभाविकः शास्त्रानपेक्षस्तमोरूप
पाप्माऽसुरः परिच्छेदाभिमानस्तस्य तिरस्करणार्थमिति यावत्॥ उक्तमाध्यात्मिकसंग्रामं निगमयति इदन्त्वेमि
ति॥ उक्तरीत्या यथोक्तानां देवानामसुराणां च पराभिभवः स्वोद्भवश्चेष्टैवरूपः संग्रामः प्रतिदेहमनादिकाल
प्रवृत्तो यथा देवासुरसंग्रामस्तथेति यो जना किमर्थं पुनरपुरुषार्थरूपो देवासुरसंग्रामः श्रुत्याऽऽख्यायते त
त्राह स इह इति स हि संग्रामोऽस्मिन्प्रकरणे प्राणानां स्वाभिप्रवृत्तिविषये विज्ञाने विधातुं प्रवृत्तस्तथाऽऽख्यायिका कथा
रूपेणाख्यायते। इन्द्रियाणां विषयवैमुख्यं धर्मः स्वाभाविको येषां तद्वाभिमुख्योपायस्योद्भवन्तीति विवेकविज्ञा
नसिद्ध्यर्थं चाख्यायिका प्रणीयते तस्मादिन्द्रियाणां प्रवृत्तौ विषयप्रावण्यं परिहर्त्तव्यं तद्वैमुख्यमेव तेषां
श्रेयोर्थिभिर्यत्नादापादेयमिति भावः॥ यजमानप्राणानामेव देवासुरभावस्योक्तत्वमनन्तरं प्राद्वायथेः॥ प्रजाप
तिशब्दस्य रूढमर्थमपाकृत्य विवक्षितमर्थमाह प्रजापतिरिति उक्तरूपः पुरुषः प्रजापतिरित्यत्र गमक
माह॥ पुरुषस्त्वेति॥ कथं पुनर्यथो[illegible]र्थ यथोक्तानां देवासुराणां तदपत्यत्वं तत्राह तस्य हीति॥ यत्रेत्युक्तसं
ग्रामनिमित्ते पराभवप्राप्ति। तत्तत्रेति देवानामुत्कर्षोपकर्षश्चासुराणामित्याशङ्क्य अस्मिन्निमित्ते कथमुद्गीथमत्राह
रणमित्याशङ्क्याह तेऽहोद्गीथेति॥ लक्षितलक्षणान्यायेन च यतितस्यापीति॥ उद्गीथमक्त्वौ वित्यपरेऽप्यपरेऽर्थः॥ तदाहर

छां॰भा॰टी॰आ॰ रा प्रयोजनं प्रश्नपूर्वकं कथयति तत्किमर्थमित्यादिना ॥ संप्रत्युद्गीथाहरणप्रकारं प्रकटयति यदा चेति ॥ अचेत
१२ नस्य करणस्योद्गातृत्वासंभवात् विशिनष्टि चेतनावंतमिति ॥ मुख्यप्राणं व्यावर्त्तयति घ्राणमिति ॥ त्वन्नत्वं कुर्वन्निति
वाजसनेयकश्रुतिमाश्रित्याहोद्गीथ[illegible]क कर्त्तारमिति ॥ अथोद्गीथभक्तिरेवेष्यते न तूद्गीतात् कथयत्तदुपास
ल नमित्याशंक्याहोद्गीथभक्तेरिति ॥ तपोयत्वा सितमुद्गातारमुपासत इति यावत् ॥ कथमुपासनमित्यपेक्षायामुद्गी
थेन कर्त्तव्यप्रार्थनयेत्याह कृतवंत इति ॥ तेह नासिक्यमित्यक्षरोक्तमर्थमुक्त्वा वाक्यार्थमाह नासिक्येति ॥ किमि
त्यक्षरमोंकाराख्यमिहोपास्यत्वेन व्याख्यायते तत्राह वेहीति ॥ उक्तमेव स्फुटयति वेल्लितेति तथा च प्राणस्योद्गी
तृदृष्ट्योपासने प्रकृतस्य परित्यागो भक्तेश्च घ्राणप्राणदृष्ट्योपास्यत्वांगीकारः प्रकृतोपादानमिति शेषः ॥ पूर्वा
परविरोधमाशंक्यते नन्विति ॥ उद्गीथोपलक्षिते नोद्गात्रेणोपलक्षिते ज्योतिष्टोमादिकर्मोद्धृतमित्युक्तं तदाह
रणं च तस्योपासनं तद्विरुद्धं नासिक्यप्राणादृष्ट्याक्षरोपासनवचनमित्यर्थः ॥ स्वोक्तेर्मिथो विरोधं परिहरति नैष
दोष इति ॥ उद्गीथोपलक्षितकर्मोपलक्षिते ज्योतिष्टोमादौ कर्मणि तास्यत्वेनोद्गातृप्राणस्य दृष्ट्योपास्यत्वेनाक्षरं वि
वक्षितमोंकारस्योद्गीथावयवत्वोपपत्तेर्नैष्ठो न स्वतंत्रो व्यापकत्वोक्तिस्तथा चाक्षरोपासनार्थत्वेन कर्माहरणानर्थ्य
पत्त्वेनत्याविरोध इत्यर्थः ॥ आश्रित्यविधानार्थं कर्माहरणमित्युक्तं तदेतत्यादि व्याचष्टे तमेवामिति ॥ स्वोत्येनचास् राम॰
१२

प्रा०ण

रणानासिकासंबद्धेनेति यावत्॥ अथ मौहासंगस्तद्द्वयेलोत्पेतस्यासंगवेर्यसाधयति॥ सहेति॥ कल्याणोगंधः
रमिरक्तं तस्य ग्रहणमेव त्वभिमानात्मा पो यमासंगस्तेनाभिभूतस्तमुपकारो गंधघ्राणकृतस्तु यः सर्वस्य का
र्यकारणसंघातस्यैतिविवेकविज्ञानं यस्यासत्यैतिविग्रहः॥ ननु कथं यथोक्तासंगस्पर्शितेत्याशंक्याह॥ सतेनै
ति॥ उक्तेऽर्थे वाक्यं यातयति॥ तदिदमिति॥ घ्राणस्यासुरपाप्मविद्धत्वे कार्यलिंगकमनुमानं सूचयति॥ यस्मादि
ति॥ उक्तानुमानावद्योतिवाक्यं व्याकरोति अत इति॥ अतःशब्दार्थमेव स्पष्टयति पाप्मनेति॥ ननु पाप्मना विद्ध
त्वात्तेन लोकोऽदुर्गंधं जानातीत्येवं वक्तव्ये सुरभिर्घ्राणस्य पापकर्मत्वाभावात्तथा च कथं तेनोभयं जिघ्रतीत्यु
क्तं तत्राह उभयग्रहणमिति॥ एकस्यापि हि विषो द्वे वा भ्रमकस्य पुरोडाशादेर्वा काकादिसंबंधादुर्गंधप्रायश्चित्तस
त्वेपि यस्योभयं हविरार्तिमार्छति स ऐंद्रं पंचशरावमोदनं निर्वपेदित्यत्रोभयग्रहणमविवक्षितमिति स्थितं
प्रथमे तत्रैव तथात्रापीत्याह यस्येति॥ न केवलं पाप्मनाहीति वाक्यशेषादत्रोभयग्रहणमविवक्षितं किंतु वाजसने
यके यथोक्तोद्गीथविद्याविषये त्वेनसमानप्रकरणोपदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मेति श्रुतेरत्रापि पाप्म
वेधवशात् दुर्गंधं जानातीत्येव वक्तव्यत्वादविवक्षितमुभयग्रहणमित्याह यदेवेति॥ ननु नासिकास्थप्राणस्य
पाप्मविद्धत्वादनुपास्यत्वे सिद्धे पापसाम्याद्वागादीनामप्यनुपास्यत्वमिति सिद्ध्यति तत्किमुत्तरग्रंथेनेत्यत आ

छां·भा·टी·आ· हमुख्यप्राणस्येति न्यायप्राप्तत्वेपि मुखवृत्तो निराकरणाभावे मुख्यप्राणस्यैवोपास्यत्वमित्याशङ्क्यानडुपासत्ताद्वाघौर्थेमु
१२ खवृत्तो वागादीनामुपास्यत्वमपाकर्त्तुमुत्तरग्रंथ इत्यर्थः। विद्धा इति विचार्य क्रमेणापोद्धृत इति संबंधः॥ उत्तरवाक्येष्व
प्रत्याख्यानमनपेक्षितं पूर्वेणसमानत्वादित्याह समानमिति अवशिष्टवाक्यैकदेशग्रहणार्थमादिपदं॥ ननु घ्राणा
दीनां पाप्मविद्धत्वादनुपास्यत्वेपि त्वगादीनां तदविद्धत्वेनानुपास्यत्वावचनान्मुख्यस्येव प्राणस्योपास्यत्वेनाव
सीयते तत्राहानुक्ता इति। उक्तानामनुक्तोपलक्षणत्वे बृहदारण्यकश्रुतिं संवादयति एवमुखल्विति। अथहे
त्यादिमुख्यप्राणविषयं वाक्यमुच्छाप्य व्याकरोत्यासुर इत्यादिना॥ पूर्ववद्वागादिष्विवेति यावत्। अश्मकृतस्य
लोष्ठस्याश्मोपादाने हेतुमाह॥ सामर्थ्यादिति॥ तस्य ध्वंसनयोग्यत्वात् ध्वंसते स्वकर्त्रपेक्षत्वादित्यर्थः॥ तर्हि प
स्य कस्यचिद्देवविषयस्य संभवात् अलं लोष्ठग्रहणेनेत्याशङ्क्य यथाश्मानमृत्वा लोष्ठो विध्वंसेतेति बृहदारण्यक
श्रुतेस्तस्यैवात्र ग्रहणमित्याह श्रुत्यन्तराच्चेति॥ दृष्टान्तदार्ष्टान्तिकाभ्यां सिद्धमर्थं निगमयति एवमिति। इति प्राणस्य वि
शुद्धत्वादनडुपासनं कर्त्तव्यमिति शेषः। फलवचनमवतार्य व्याकरोति एवं विद इत्यादिना॥ प्राणो विविति स्पष्टिनो वि
नाशे हेतुमाह यस्मादिति। नासिक्यप्राणस्य मुख्यप्राणस्य चैवायुविकारत्वेन प्राणत्वाविशेषात्तत्पाप्मनावेधावेधौ
न स्यातामिति शंकते॥ नन्विति॥ स्थानविशेषसंबंधासंबंधाभ्यां द्वयोरपि पाप्मवेधावेधव्यवस्थोपपत्तेति परिहर राम०
वे १२

तिनैष दोष इति। स्थानावस्थावच्छिन्ने करणे वैगुण्यं विशेषासक्तत्वं तस्मात्तद्रूपस्य नासिकस्थप्राणस्यापि विद्धता स्या
दिति यावत्ततदसंभवात् विशेषसंबंधप्रयुक्तवैगुण्यापापयोगादित्येतत्। श्लिष्टमुक्तमुपपन्नं॥ स्थानेन संबंधविशेषात्
घ्राणप्राणस्य पाप्मविद्धत्वे तदभावाच्च मुख्यप्राणस्य तदविद्धत्वमित्येतत्तत्र दृष्टांतेन स्पष्टयति यथेत्यादिना॥ ननु वाग्दो
षवत् घ्राणसंबंधित्वाभावादिति शेषः॥ घ्राणदेवता विद्धा प्राणदेवता तु न विद्धेत्यत्र गमकत्वेनानंतरं वाक्यं व्या
चष्टे यस्मादिति॥ मुख्यप्राणस्य पाप्मवेधाभावमुपसंहरति अतश्चेति। पाप्मकार्यमासंगः तस्य प्राणेऽनुपलंभादित्य
तःशब्दस्यैवार्थः॥ हिशब्देनोक्तं पाप्मावेधं विशुद्धत्वे हेतूकृत्य मुख्यप्राणाविशुद्धिमुपसंहरति ह्येष इति। तस्य विशु
द्धिहेत्वंतरमाह यस्माच्चेति। अतो विशुद्धत्वात्तु न रत्वं इति संबंधः। सर्वार्थत्वं प्राणस्य प्रश्नपूर्वकं प्रतिपादयति कथमित्या
दिना। घ्राणादीत्यादिशब्देन कार्यमप्युच्यते॥ तेनैनास्तृप्यंतीति श्रुत्यंतरमाश्रित्याह तेन हीति। प्राणावृत्तिहेतुभ्या
मन्नपानाभ्यां संघातस्थितिरतःशब्दार्थः सर्वार्थत्वे द्वितीयस्यातःशब्दस्यार्थः मुख्यप्राणोपयुक्तत्वादन्नापां संघा
तस्थितिहेतुत्वमित्यत्र प्रश्नपूर्वकं लिंगं दर्शयति कथमित्यादिना। वृत्तिमेव विशिनष्टि अन्नपाने इति। अन्वहमुपयु
ज्यमानेऽन्नपाने प्राणस्थितिहेतुरिति यावत्। प्राणस्योत्क्रमिषायामपि संघातः स्वयमशनपाने कृत्वा स्था
स्यतीत्याशंक्याह॥ अप्राणो हीति। तदा प्राणोत्क्रमिषावस्थायामिति यावत्॥ ननूत्क्रांत्यवस्थायामशिशिषाद्यभा

वादेवसंघातस्योत्क्रांतिर्नत्वप्राणाद्यभावात्तत्रप्रमाणाभावादतआहदृश्यतेहीति॥तदितिमुखव्यादानस्यातो
ऽन्नग्रहणंतथानोपलक्षणार्थं॥विष्णुद्विगुणात्मकमुख्यप्राणात्मोद्गीथदृष्ट्योद्गीथावयवभक्तमोंकारंख्यमसुमुपा
स्यमितिपुनरुक्तंस्थानीतत्रैवांगिरसबृहस्पत्यायास्यगुणत्रयविधानार्थमुक्तस्यैवमुच्छापपतितेहेतितत्रवृत्तिकाराभि
प्रेतंसंबंधंदर्शयतितेमुख्यमिति।यदभिप्रेतसंबंधेगमकमाहप्रत्तमिति।अव्यवहितसंबंधसंभवेव्यवहितसंबंधकल्प
नानपुनक्तेतिपरिहरतिभवत्वेवमिति।आंगीरसंगिरोबृहस्पत्यादिशब्दैरुपदेशोपिगुणत्रयविशिष्टप्राणोपासनेन
विरुध्यतेनतस्यप्रधानानामबाधेप्राणोपासकानामृषीणामुपदेशोनत्वागमहेत्वंगिरोबृहस्पत्यादिशब्देभ्योपि
प्रथमप्रतिपन्नानृषीन्विहाययौगिकवृत्तिप्रतिपत्तव्यगुणमात्रप्रतियत्नत्वनुपपन्नेरित्यर्थः॥प्राणोपासकानामृ
षीणामभिधानमैतरेयकश्रुत्यादृश्यतेश्रुत्यंतरवदिति॥तदेवस्पष्टयतितस्मादिति।शतर्चिनोनामप्रथममंड
लदृशाऋषयएषचप्राणोयस्मात्पुरुषंसंधाताव्यंशतवर्षाण्यभिगतवानतस्मादेतमेवप्राणंसंतमृषिशरीरस्थित
मपिशतर्चिनशब्दवाच्यंवदंतीतियोजना॥शतर्चिनशब्दस्यद्वयोरुभयविषयात्वाशब्दांतराण्यपिसेनेत्याह।तथेति
आद्यंतमंडलेमुक्त्वामध्यमानांमंडलानांद्रष्टारोमाध्यमाऋषयस्तेपिप्राणात्तस्यस्वात्मनिमध्येसर्वजगद्विधारकत्वा
तगृत्समदस्तुद्वितीयमंडलदर्शित्वात्तस्यैकालेवागादीनांगिरणात्प्राणोगृत्सश्रेणोविसर्गकारणामदहेतुत्वादपानो

मदः प्राणापानात्मकत्वात्प्राणोपि तथोच्यते॥तृतीयं मंडलं दृष्टवान् विश्वामित्रः तथा व्यपदिश्यते तस्य हि विश्वं भोज्य
जातं स्थितिहेतुतया प्राप्तिं गमासीत्॥वामदेवस्तु चतुर्थमंडलद्रष्टा प्राणोपि तच्छब्दवाच्यस्तस्य वागादिदेवतोभ सं
जनीयत्वात्॥पंचममंडलद्रष्टात्रिरित्युच्यते प्राणोपि तथैवोच्यते तस्य पाप्मनोनर्थरूपाया त्राति सर्वत्रात्तृत्वात्
आदिपदेन भरद्वाजादिपदानि गृहीतानि दृष्टांतमेवं व्याख्या पुहार्ष्टीति कमात्तहयेति॥किमिदं गिरः प्रभृतीन्यालो
करोति श्रुतिरत आह भद्रेति॥तथा च सप्तमे प्राणस्य सार्वात्म्यं व्यपदिश्यते तथा त्रापि तस्य तत्रर्षिरूपं त्वेविवक्षि
तमित्याह प्राणो वा इति॥अव्यवहितं संवेद्य संभवे फलितं वाक्यार्थं कथयति तस्मादिति॥प्राणस्यांगिरस्त्वं व्युत्पादयति प
श्मादिति। अंगिरः शब्दवद्बृहस्पतिशब्दोप्युभयत्र नेतव्य इत्याह तथेति। प्राणस्य बृहस्पतित्वं साधयति वाचश्चेति
अंगिरो बृहस्पतिशब्दवद्ब्रह्मणस्पतिशब्दोप्युभयत्र द्रष्टव्य इत्याह तथेति। तस्योभयत्रवृत्तिं विशदयति। यद्यस्मा
दिति पक्ष्माद्ब्रह्मणस्पतेर्नापास्यः प्राणः स एवात्रोपासकत्वा दृषिरपि तथेति योजनापयोक्तो नामरूपाणामेवो
को गुणः कर्मणुपासनं नाम्येषां विशेषणं च नादित्याप्राणंशस्याहानैथेति॥विशेषस्यनशेषाति च जं कल्पं प्रदर्शनार्थत्वा
दित्यर्थः॥पश्चात्प्रोक्तोपासनस्यावृत्तिषु नियमाभावेगामकं दर्शयति न केवलमिति॥से प्रतिविहितोपासनस्य दृष्टफल
मादेहपातानिकीकरोति विदित्वेति॥भूमिकां कृत्वा विवक्षितमुपास्तिफलं कथयति तथेति। दृष्टमिति विशेष

छां॰ भा॰ टी॰
१५

णादस्माच्च फलोत्तरमाचष्टे। प्राणेति। आत्मविषयं प्राणाविवर्जितं प्राणो गोभिश्चं चरामिति यावत्॥ उपसंहारस्य प्रयोजनमा
हाधिदैवेति। अनंतरमाध्यात्मिकप्राणदृष्ट्योद्गीथोपासनवचनादिति शेषः॥ किमिति दैवताविषयमुद्गीथोपा
सनं प्रस्तूयते तत्राह अनेकधेति। प्राणरूपेणादित्यादिरूपेण चोद्गीथस्योपास्यत्वाद्देवताविषयत्वमुद्गीथस्यास्ति प्रस्तावो
स्या पपन्न एवेत्यर्थः॥ आदित्यादिमतमेवं त्रिधा येनवाक्यार्थं कथयत्यादित्यदृष्ट्येति॥ नमादित्यमुद्गीथमुपासीते ६
त्यादित्यशब्दस्योद्गीथशब्दस्य च सामानाधिकरण्यमयुक्तमुद्गीथशब्दस्य प्रकरणादक्षरवाचित्वादादित्य
शब्दस्य च ज्योतिर्विषयत्वाद्भिन्नार्थयोश्च शब्दयोः सामानाधिकरण्यायोगादिति शंकते नन्विति। आ
दित्येपघपि नोद्गीथशब्दो रूप्यावर्त्तितुमर्हतीति तथापि गौण्याचेत्तत्राह नेः सामानाधिकरण्यसिद्धिरित्युत्त
रमाह उच्यत इति। प्रजार्थमुद्गायतीत्येतद्व्याचष्टे प्रतिप्रजानामिति। अन्नोत्पत्त्यर्थमुद्गायतीति पूर्वेणास्य संबंधः॥
तदेव व्यतिरेकद्वारा साधयति नहीति। आदित्यस्यान्नार्थमागानमतः शब्दार्थो॥ न तस्योद्गातृत्वप्रत्यक्षमुद्गा
नमुपलब्धं प्रसिद्धं चाशंक्याह उद्गायतीवेति॥ उपमामेवोपपादयति यथेति॥ अथात्मनेऽन्नाद्यमागायेदिति श्रुत्यंत
रे यथान्नार्थमुद्गाता गायति तथादित्योऽपि प्रजानामन्नाद्यमागायतीत्यर्थः॥ उद्गीथशब्दस्यादित्ये संभ
वं प्रसाध्य उपफलितमाह अत इति। आदित्यदृष्ट्योद्गीथेऽभेदात्प्राणादित्ययोर्भिन्नत्वात् भिन्नमेवतयोरुपासनमुप राम॰
योपासनमुपपाद्य फलोक्तिं व्याचष्टे किं चेत्यादिना एवंगुणं तमस्तत्त्वभवं निवर्तकत्वगुणसहितमिति यावत् १५
तत्त्वध्यात्ममधिदैवतमिति स्थाने १

रियमतत्राहयद्यपीति प्राणादित्ययोः स्वरूपभेदाभावे प्रश्नपूर्वकं प्रतिपादयति कथमित्यादिना। उशब्दोप्यर्थः स्का ८
नमेश्रुती भेदमनुजानाति गुणतः साम्यं साधयति यस्मादिति। नामतः साम्यं संगिरन्ते किंचेति। सवितृवत्प्राणोपि प्रंत्यावि
शब्देप्रवृत्तिमाशंक्याह यस्मादिति। स्वर इत्येवगच्छत्येवेति यावत् तत्तस्मिन्नेवंविधे स्थूलदेहे न प्रत्यागच्छतीति तस्मा
त्प्राणो स्वरशब्दप्रवृत्तिरेवेत्यर्थः। सवितर्यपि तर्हि तच्छब्दप्रवृत्तिरेवेत्याशंक्याह सवितेति। आदित्यस्यास्तं
गतस्य प्रत्यहमेकत्रैवागतिदर्शनान्नास्मिन्प्रत्यास्वरशब्दस्यापि प्रवृत्तिरस्तीत्यर्थः। अतः प्राणादित्ययोरुक्तं साम्यमिति
गमयति अस्मादिति। अन्योन्यसाम्यकृतं फलमाह तस्मादिति। प्राणादित्यावेकीकृत्य तद्दृष्ट्योद्गीथावयवभूतमोंका
रमेवं अक्षरमुपास्यमित्यर्थः॥ अथाध्यात्मिकं अधिदैविकं चोद्गीथोपासनं प्रसक्तं प्रत्युतदेवसमस्यैकीकृत्योक्तं
तथा च वक्तव्याभावात्किमन्तरेणाग्रंथेनेत्याशंक्याध्यात्मिकमेवोद्गीथोपासनमन्तरूपात्त्याहाथेति। कोसौ व्यानो
यदृष्ट्योद्गीथोपासनमुपदिदिक्षितमत आह व्यप्रमाणलक्षणामिति।। प्रसिद्धेवं व्यानं वर्जयति प्राणस्येवेति वक्ष्यमा
णलक्षणामित्युक्तं व्यक्तीकरोति अथेति। तन्निरूपणार्थमादौ प्राणापानौ निरूपयति यद्वा इत्यादिना॥ ताभ्यामेव
मुखनासिकाभ्यामित्येतन्तरा। स्यातामेव प्राणापानौ व्यानस्य तु किमापातमिति शंकित्वात् स्वरूपं दर्शयति तत इत्या
दिना॥ संधिमेवस्फुटयति तयोरिति। प्राणापानयोर्वृत्त्योरभावावस्थायां मध्ये चव्यापोवृत्तिविशेषो योस्ति स व्यान

श्री॰भा॰टी॰अ॰
९६

शब्दार्थं इत्यर्थः॥ संक्षिप्तेक्षममर्दे शब्दवृत्तिर्ध्यानं इति सांख्या योगाश्चाहुस्तान्प्रत्याह यः सांख्यादीति॥ सांख्यानां योगा
नां च शास्त्रे प्रसिद्धो यो वा यो हेतुर्हि विशेषः स्वकं धारिदेशुगोनासौ ध्यानं॥ अस्य विशेषनिरूपणादिति योजना॥ ध्यान
स्य प्राणापानसापेक्षत्वात्तयोरन्यतरस्योपासनमेवोचितं न ध्यानोपासनमिति मन्वानश्चोदयति कस्मादिति॥ म
हत्तायासेन ध्यानसतत्त्वनिरूपणेनेति यावत्॥ तथापि तस्य वैशिष्ट्यमुपेत्य परिहरति वीर्यवदिति॥ ध्यानस्यैवोपासन
मिति शेषः॥ तदेव प्रश्नद्वारा प्रपंचयति कथमित्यादिना॥ कथं ध्यानस्य वीर्यवत्त्वं मे प्रसिद्धं प्रतिज्ञापन्ने कारणा
भावादित्याह ध्यानेनेति॥ वाचो ध्याने निर्वर्त्यत्वे लिंगं दर्शयति यस्मादिति॥ यावागोत्पादिवाक्यानामर्थं संक्षिपति
तथेत्यादिना॥ अतो यानीत्यादि व्याचष्टे न केवलमिति॥ ध्यानेनिर्वृत्तेन निर्वर्त्यपत्नीति पूर्वेण संबंधः॥ पात्न्यपीत्या
पथोक्तो॥ नि कर्माणि तानि लोको ध्यानेनैव करोतीत्युत्तरत्र संबंधः॥ प्रयत्नाधिक्यान्निर्वर्त्यानि कर्माणि पेवो संहरति
पथेति॥ पथा तानि कर्माणि तथान्यान्यप्येवंप्रकाराणीति योजना॥ ध्यानस्य वीर्यवत्त्वे महेतुत्वे फलितमाहात
इति॥ वैशिष्ट्येऽपि किं स्यादिति चेत्तत्राह विशिष्टस्येति॥ वैशिष्ट्यफलमुपसंहरत्येतस्येति॥ फलवत्त्वादित्युक्तमुपा
स्तिफलं स्पष्टयति कर्मेति॥ ध्यानदृष्टोद्गीथोपासनस्यांगावबद्धत्वादिति शेषः॥ उद्गीथोपासनप्रसंगेनोद्गीथा
क्षरोपासनं प्रस्तौत्यथेति॥ विशेषणान्तात्पर्यं दर्शयति॥ भक्तीति उद्गीथाक्षराण्युपासीतेत्युक्ते भक्त्यक्षराण्युपास्या राम॰
९६

निप्राप्तानितानिमाभूवन्नितियतोमन्यतेश्रेनिस्ततोविशेषणंकरोतीत्यर्थः॥विशेषणश्रुतिंव्याकरोत्तद्यथे
तिनामाक्षरोपासनमुद्गीथोपासनस्यकिंचित्करमित्याशंक्याहनामेति।यथालोकेहरहनुमिश्रादिवाचकशब्द
स्प प्रयोगेषाचांपुरुषविशेषस्योपासनंगम्यतेतथेहापीत्यर्थः॥नामाक्षरोपासनेनामवत्तदुपासनेपितदुपासन
मेवकथमित्याशंक्याविमजहे।प्राणएवेति।प्राणस्यैवेत्येषासादृश्यंप्रश्नपूर्वकमाह।कथमित्यादिना।गीरित्य
स्मिन्नक्षरेवाक्दृष्टिःकर्त्तव्येत्याह।वागृगीरिति।वाचोगिरश्चैषासादृश्यंदर्शयति।वाचोहेति।उअक्षरयोः
प्राणवाग्दृष्टिर्विधामित्यस्मिन्नक्षरेऽन्नदृष्टिःकार्येत्याहतथेति।थकारान्नयोरपेक्षितंसादृश्यंदर्शय
तिअन्नेहीति।प्राणएवोदित्यादौसादृश्यंस्फुसैवोक्तंद्योरेवोदित्यादौतूतोक्तंतथाचतत्रसादृश्याभावेकथं
दृष्टिकरणमित्याशंक्याहत्रयाणामिति॥अन्तरिक्षमाकाशस्तदंतःप्रतिष्ठालोकास्तेनगीर्णाइवेतिमत्वोक्ता
हगिरणादिति॥अग्न्यादीनांगिरणादितिसंवर्गविधायांद्रष्टव्यं॥सामवेदोवैस्वर्गोलोकइतिस्वर्गलोकत्वे
माकृ नसामवेदस्यसंस्तुतत्वादितिहेतोःस्वर्गेति।यजुषास्वाहास्वधादिनेतिपावत्॥अध्यात्ममधिलोकमधि
दैवमपिवेदेचनामाक्षरोपासनमुक्त्वाततफलोक्तिमवतारयन्व्याकरोतिदुग्धेति।योवाचोदोहइत्यत्रष
ष्ठीकर्मतादृष्टव्या॥तमेववाग्दोहंप्रकटयतिऋग्वेदादीतिनित्याध्ययनफलस्वाध्यानोच्चारणक्षमत्वंदैतदन्ना

छांभा॰टी॰आ॰ यासेनाप्यसंभवतीत्यर्थः॥तदितिप्रकृतफलपरामर्शः॥षष्ठीपूर्ववत्तामितिदोहोक्तिः॥वाचएवदोहेकर्म
१२ त्वकर्तृत्वेत्वंचेत्याह॥आत्मानमेवेति॥योदोग्धासावागेवसा चात्मानमेवतंदोग्धीतियोजना॥यथोक्तानीति
प्राणवागन्नादिरूपत्वेनोक्तानीतियावत्॥यथोक्तगुणान्युद्गानाक्षराण्युपास्त इत्यादिधर्मकाणीत्यर्थः॥
उद्गीथाक्षराणीत्युक्तविशेषणानुवादेनस्फुटयत्युद्गीथइतीति॥उद्गीथइत्येवंरूपस्यनाम्नोक्षराणीति
पावत्॥वागादिसमृद्धिफलकमुपासनमुपदिश्यफलसमृद्धिरूपेणप्रकारेणाभवतीतितत्प्रकारंज्ञानंसर्व
काम्योपासनशेषभूतंप्रासंगिकंविधीयतइत्याहाथखल्विति॥वागादिसमृद्धिफलकोपासनानन्तर्य
मथशब्दार्थः॥वक्ष्यमाणोपासनानांसर्वकाम्योपासनाशेषत्वद्योतनार्थोखल्वित्युक्तं॥प्रासंगिकत्वंद
र्शयतीज्ञानमिति॥कामशब्दःफलविषयःतच्छब्दःप्रकारज्ञानपरामर्शीउच्यतेविधीयतइत्यर्थः॥ध्यान
प्रकारंप्रश्नपूर्वकंविशदयतिकथमित्यादिना॥इतिशब्दार्थेआभिनपातएवमिति॥एवंशब्दार्थमुदाहर
णानिष्ठतयास्पष्टयतितद्यथेति॥उपसत्स्वादिभिरित्यादिशब्देनछंदोदेवतादिग्रहःतेदेवतादिभिरित्यादि
पदेनार्षेयादिग्रहः॥गायत्र्यादिनेत्यादिपदेनमुष्णिगनुष्टुब्बृहत्यादिसंग्रहार्थः॥त्रिवृत्पंचदशसप्त
दशएकविंशइतिप्रसिद्धःसोमयागेस्तोमः॥आत्मनेपदप्रयोगप्रतिपन्नमर्थमाहस्तोमंगेति॥पत्रेक राम०
१२

ध

तृगामिफले तत्रात्मनेपदं प्रवृत्तिप्रकृते चस्तोष्यमाणाद् इत्यात्मनेपदं श्रूयते तस्मादेतत्फलस्य कर्तृगामित्वं
गम्यते॥ अन्यथा पूर्वोत्तरयोरिव परस्मैपदप्रयोगप्रसंगादित्यर्थः॥ यांदिशाम भीत्यभिव्याप्येत्यर्थः तोष्यद्
वत्ताविशेषामितिशेषः॥ अधिष्ठातृशब्देनेंद्रादयो गृह्यंते॥ आदित्यवंतरादिगवस्थिता साधारणाधर्मैर्
ग्रहार्थी॥ आत्मानं स्वरूपं गोत्रादिभिरूपस्य सोद्गाता स्तुवीतेति संबंधः॥ नामादिभिरित्यादिशब्देन वर्णाश्र
मादिग्रहणं॥ अंतत इत्यस्यार्थमाह सामादीनीति॥ पूर्वोक्तान्सामादीन्सर्वानुक्तेन क्रमेणाख्यातत्वात् तद्व
तानेत्वात्मानमपि संविदित्यपेक्षितफलमनुसंदधानः स्वरादिष्वप्रमादमकुर्वन्नुद्गाता स्तुवीतेति योज
ना॥ यत्र कर्मण्युपयुक्तानां यथोक्तरीत्या स्तोता भवति तत्र क्षिप्रमेवास्मै स स कामः समृद्ध्येत यत्कामः स
नुपः स्तुवीतेत्यन्वयः॥ इतिशब्दः प्रासंगिकोपासनसमाप्त्यर्थः॥ प्रासंगिकं हित्वा प्रकृतमनुसंधत्ते ओमि
त्येतदित्यादीति॥ पुनरुपादानस्य तात्पर्यमाहोद्योपयति आदिशब्देन पूर्वोक्तान्युपसर्जनानि गृह्यंते॥ उद्गीथ
स्यतैर्व्यवहितत्वात्प्रकरणविच्छेदशंकायां ततोऽन्यस्मिन्नर्थे प्रसंगः स्यात्समाप्त इत्येवमर्थं पुनरुपादान
मित्यर्थः॥ देवा वै मृत्योरित्यादेस्तात्पर्यमाह प्रकृतस्येति॥ अक्षरव्याख्यानप्राप्तावनुवादभागं प्रस्याह
ओमित्यादीति॥ देवासुराहवे यत्रैत्यत्र व्याख्याता देवाः मारकादोमरणस्याप्मनः सकाशादिति यावत्॥ की

छां॰भा॰टी॰अ॰ यं कर्मणां प्रवेशो नाम तत्राह वैदिकमिति। तदिति वैदिकं कर्मोच्यते॥ ते छंदोभिरित्यादि व्याचष्टे किंचेति॥ नहि स
१८ र्वैर्मंत्राः सर्वत्र विनियुज्यंते तथा चैकस्मिन्कर्मणि अनुष्ठीयमाने विनियुक्तान्मंत्रान्न हित्वा कर्मांतरे प्रवृ
त्तेर्जपादि कुर्वतः स्वात्मानं देवा इत्यादितत्त्वं ततस्तस्मात्तन्मंत्रफलरूपतां तेषामभिसंधेः। तेषां छंदोभिश्छादितत्वे छंद
सां छंदस्त्वप्रसिद्धिप्रकारमभिनयति तत्तस्मादिति। कर्माण्यनुतिष्ठतां देवानां मृत्युवश्यतां नेत्याह तानिति तत्रे
५ ति वैदिककर्मप्रारंभोक्तिः। त्रेशब्दोऽप्यर्थः। यथोक्तकर्मपरानपि जानन्मृत्युः पर्यपश्यदिति संबंधः॥ कर्मणां मृत्युपर
गोचरत्वं दृष्टांतेनाह यथेति। दार्ष्टांतिकभागस्याविवक्षितमर्थं संगृह्णाति मृत्युरिति। दार्ष्टांतिके दृष्टांतोदकस्था
नीयं किं स्यादिति प्रश्नपूर्वकं दर्शकं दर्शयति क्वासावित्यादिना॥ ऋगादीनां नित्यत्वेन क्षयाभावान्मृत्युरिह
कस्थानीयतेत्यस्यांशस्याविवक्षितमर्थमाह शुद्धिमिति। कर्मणां शुद्धिकृतकत्वेन फलतः स्वरूपतश्च क्षयितासिद्धेरिति भा
वः। मृत्युपरिहारोपायमुपदिशति ते देवा इत्यादिना। कर्मभ्यस्तत्काशादूर्ध्वा व्यावृत्ता इत्यर्थः॥ सर्वकर्म
संग्रहार्थं कर्मभ्य इति बहुवचनं॥ अवैदिककर्मोपादानस्य कर्मिणाप्रसिद्धत्वाद्वैदिककर्मत्यागार्थं विशिनष्टि ऋच
इति। कर्मत्यागमात्रोक्तेः कृतकस्य तात्पर्यं वारयति। तेनेति। तेनेति किं तदक्षरं तदाह ॐकार इति। उदात्तादिरूप
स्वाभावादक्षरस्य न स्वरशब्दत्वमित्याशंकां परिहरति कथमित्यादिना॥ ऋचमाप्नोतीत्यस्य व्याख्यानं न स्वाधीनाक राम॰ १८

ऋ

रोतीत्यर्थः॥ अतिस्वरस्यातिशयेनादराविषयोच्चारयतीति यावदेवं तावत् ज्ञेयम् उक्तः सामन्तं प्रत्येकमोंकारोच्चारणाद्वारेणो
वाप्तिदर्शनाद्धिस्यातिशब्दार्थः॥ तश्वोपिपर्यायस्यसंप्रतिपन्नस्वरत्वादितिदर्शितार्थः॥ अमृतमभयं यत्तथाविधं ब्रह्म
प्रतीकत्वादित्यर्थः स्यातत्प्रविश्यश्च हन्न वृद्ध्यातत्त्वानंदत्वेस्य थः॥ भवन्तु देवानामेवमस्माकं तु किमायातमित्याशंक्या
हसयोन्योयाति॥ राजगृहं प्रविष्टस्य विशेषदर्शनादक्षरं प्रविष्टस्यापि फले विशेषः स्यादित्याशंक्याह तत्प्रविश्येति॥
अमृतत्वेन विशिष्टा इति शेषः॥ श्रीः॥ एवं शांतरस्य तात्पर्यमाह प्राणादिस्येति प्राणवस्योद्गीथस्य चैकत्वं कृत्वा तस्मि
न्नेसख्यातं प्राणादृष्ट्यापि दैवतमादित्यस्य दृष्ट्या च विशिष्टस्योद्गीथस्य पदु पासनमुक्तं तदेवानूद्य नानादित्यप्राणा
नोरश्मीनां चेन्नो दृष्ट्वदगुणास्तद्विशिष्टदृष्ट्यातस्यैवोद्गीथावयवस्यासरस्यानेकपुत्रफलमुपासनमनेन
ग्रंथेनवक्तव्यमित्युत्तरोग्रंथः संप्रतिमत्तयत इत्यर्थः॥ अमृताभयगुणकास्येरोपासनानंतरमथशब्दार्थः॥
प्राणावोद्गीथयोरेकत्वे वैदिकप्रसिद्धिमदर्शनार्थं खल्विति तु ज्ञोनापोरेकत्वमस्कृत्य आदित्यस्योद्गीथयोयास्तिम
क्तामनुदतिअसाविति उद्गीथादित्ययोरेकत्वं प्रमाप्य पूर्वकं उपपादयति उद्गीथ इत्यादिना॥ उच्चारयन्नेवेतीति संबं
धःस्वरतेर्गत्यर्थत्वात्कथमुच्चारयन्नितुच्यते तत्राहानेकार्थत्वादिति गच्छन्सविता प्राणिनां प्रवृत्त्यर्थमोमिति
स्यानुज्ञां कुर्वन्निवगच्छतीति तस्मादोंकारत्वं सवितुरित्याह अथैवेत्यादिना॥ आदित्यदृष्ट्योद्गीथमुपास्यमरन्

छां॰भा॰टी॰आ॰
१६

श्री

चानंदतीत्तमेतमिति॥ निंदाफलं दर्शयति अत इति। पर्यावर्त्तयादिति प्रथमपुरुषेऽस्य मारणे किमिति मध्यमपुरु
षो व्याख्यायते तत्राहत्वे योगादिति। पुरुषं छंपपदे मध्यमपुरुषविधानादित्यर्थः॥ रश्मिभेदगुणादृष्टिविशिष्टोद्गी
थोपासनस्य फलं कथयत्येवमिति। वक्ष्यमाणाध्यात्मबुद्धिसमाधानार्थमुक्तं देवताविषयं दर्शनमुपसंहरति
ति इत्यधिदैवतमिति। अध्यात्मप्राणादृष्ट्योद्गीथोपास्तिमुक्तामनुवदति अथेत्यादिना॥ कथं प्राणोद्गीथयोरेक
कत्वमित्याशंक्याह तयोरिति यथा प्राणो नामप्रवृत्त्यर्थमोमित्यनुज्ञां कुर्वन्निव वागादिष्वेव गच्छतीत्युक्तं तद्वदिति यावत्॥
उक्तमेव व्यतिरेकद्वारा स्फोरयति न हीति। मुमूर्षेः समीपवर्त्तिनो वांधवो मरणकाले प्राणस्य वागादिप्रवृत्त्यर्थम
नुज्ञाकरणं नैव जानंतीति तथा च जीवदवस्थायामोमिति तदनुज्ञावशादेव वागादीनां प्रवृत्तिरालक्ष्यते तस्मा
त्प्राणस्यानुज्ञामात्रमोंकरणमित्यर्थः॥ प्राणादित्ययोरध्यात्माधिदैवतयोरुद्गीथत्वाविशेषात्प्राणवदादि
त्येऽप्यनुज्ञामात्रेमोंकरणमवधेयमित्याह तत्सामान्यादिति॥ प्राणादृष्ट्योक्तामुद्गीथोपास्तिं निंदित्वा विवक्षिता
मुपास्तिमुपन्यस्यति एतमु एवेति भूमानं बृहत्त्वोपेतमिति यावत्॥ मध्यमपुरुषेणात्र तद्देशस्य वैकल्पिकत्वेऽपि प्र
थमपुरुषशंकया पाठान्वयं व्यावर्त्तयति पूर्ववदिति। एकत्वदर्शिनिंदाद्वारा प्रश्नानोपासनं सफलमुपसंहरति प्राणा
त्यादिना पूर्वोत्तरयोर्ग्रंथयोः संगतिमाशंक्य तात्पर्यप्रदर्शनपूर्वकमनंतरग्रंथमवतारयति व्याकरोतीति अथेत्यादिना॥ न

रामः
९६

यथाश्रुतंस्यान्नमेवहोतृषदनंकिंनेष्यतेतत्राहनहीतिहौत्रात्कर्मणोपकृत्फलमाहृत्यपत्तेस्तत्प्रश्नपूर्वकमविशेषतो
दृशीपुतिकिंतदित्यादिना॥ नियातद्रूपमवधारणातिशयफलंचक्रियापदेनसंबध्यते॥ अपिपृष्टव्हस्तानिष्ठानेतरभावि
तयानेतव्यः॥ इष्टमुद्गानमेवस्पष्टयतिशकुंद्गात्रेति॥ कथमन्यनिष्ठात्कर्मणोन्यत्रफलमाहेत्यंशंवयमित्याशंक्याह
चिकित्सयेतिरुद्गातीप्रतावोद्गीथैकत्वविज्ञानमाहात्म्यात्प्रामादिकंस्वकर्मणिप्राप्तंक्षतंहौत्रात्कर्मणःसम्यक
प्रयुक्तात्प्रमाणाद्वात्प्रतिसंदधातीत्यर्थः॥ इयमेवेत्यादिसंदर्भस्यतात्पर्यमाहार्थेति॥ पुत्रादेष्वैकदेशविषयोपास
नोपदेशानंतरमेवंसंप्राप्तज्योतिष्टोमादावपिकृतस्यासमग्रेष्वपिप्राप्यर्थमपिदैवाध्यात्मविभागेनोद्गीथविष
पमेवापवर्गमुपासनमस्मिन्ग्रंथेविधातुमिष्टमित्यर्थः॥ तत्रतदंगभूतमुपासनमादौविदधातिइयमेवेति॥ पृथि
व्यामृक्दृष्टिरग्नेःसाकर्मांगस्यसंस्कर्तव्यत्वादित्याभि[illegible]प्रेत्याहऋचीति॥ ऋचियथापृथिवीदृष्टिरनंतरवाक्ये
विहितातथाग्निःसाम्नेत्यत्राग्निदृष्टिःसाम्निविधीयतेपूर्ववदित्याहतथेति॥ ऋक्त्वंपृथिव्याःसाम्निस्वंचाग्नेरम
सिद्धमितिशंकतेकथमिति॥ ऋक्सामत्वसिद्धिंविदुत्तरमाहोच्यतइति॥ तयोराधाराधेयभावेगमकंदर्शयति॥ त
स्मादितिॠचिपृथिवीदृष्टिःसाम्निचाग्निदृष्टिरित्यत्रहेत्वंतरमाहयथाचेति॥ पृथिव्यग्न्योरत्यंतभेदाभावंप्रश्नपू
र्वकंप्रकटयतिकथमित्यादिना॥ कर्मांगयोःसहप्रयोगादृक्साम्नयोरन्योन्यमव्यभिचारान्नात्यंतभेदस्तथापृथिव्य

छां॰भा॰टी॰अ॰
२०

ग्नेरप्येकशब्दवाच्यत्वान्नात्यंतंभिन्नतेत्यर्थः।तयोरप्यंतमेदाभावेफलितमाहतस्माद्वेति।पृथिवीसाशब्दवाच्यात्वे
त्वादग्नेरमःपुंस्त्वादितिद्रष्टव्यंपर्यायांतरमुच्छाप्यांगीकरोतिसामाक्षरयोरिति।कथंपुनर्नक्षत्रपर्यायेततदेतस्यामित्या
दिवाक्यंनहिनक्षत्रेषुचंद्रमसःस्थितिरतआहनक्षत्राणामिति॥नक्षत्राधिपत्यात्तदुपरिभावेनचंद्रमसस्स्थितेरित्यधि
शब्दार्थः।नक्षत्रसहितंचंद्रमसंपरामृशतिसशब्दः॥अंगोपासनानिकानिचिदुक्तानितादृगेवोपासनांतरमाहाथेति।
आदित्यस्यमंडलात्मनोयद्रूपंशुक्लंदृश्यतेऋचितद्दृष्टिःकर्तव्येत्यर्थः॥तदेवरूपंविशिनष्टिभाइति।तामेवव्या
चष्टेशुक्लादीप्तिरिति॥यथापूर्वोक्तरूपदृष्टिस्तथासाम्निवक्ष्यमाणरूपदृष्टिरनुष्ठेयेत्याहाथेति।नन्वादि
त्येशौक्ल्यंवदन्नातिशुक्लंकार्ष्ण्यंनास्माभिरनुभूयतेतत्राहतद्धीति॥एकांतेनसमाहितानांशास्त्रसंस्कृतानांपुंसांदृश्यत
इत्यादित्येनिरतिशयंकार्ष्ण्यंदृश्यतेतथाचतद्दृष्टिःसाम्निक्लिष्टेत्यर्थः।अथयदेवैतदित्यादेस्तात्पर्यमाहतएवेति।अं
गोपासनानिसमाप्यानंतरमाधिदैविकंप्रधानोपासनंविवक्षुःउपास्यस्यरूपमुपन्यस्यत्यथेत्यादिना॥किमितिहिर
ण्मयपदमुपमार्थंव्याख्यायतेहिरण्यविकारत्वमेवात्रविवक्षितंकिंनस्यादित्याशंक्याहनहीति॥अपहतपाप्मत्वा
संभवंसाधयतिनहीत्यादिना॥पाप्मादीत्यादिपदंतत्कार्यसंग्रहार्थं॥किंचचक्षुष्युपास्येपुरुषेतुवर्णविकारत्वस्याग्र
हणाल्लोकामेवहिरण्मयपदमित्याहचाक्षुषेचेति॥नन्वतत्रापिप्रातिदेशिकंतेनेहतांऋक्सामगेष्णत्वादिनातादृशेनवि

राम॰
२०

रोयात्तस्माद्गौणमेव हिरण्मयंयद्भिमित्युपसंहरति। अंत इति। हिरण्मयश्मश्रुरित्यादिविशेषणतोपि तुल्यं गौणत्वमि
त्याह अन्तरेषयोतिा नन्वादित्यादिमंडले पुरुषो नास्माभिर्दृश्यते तत्राह निवृत्तचक्षुर्भिरिति। विशिष्टाधिकारिणां हि दृश्य
पुरुषदर्शनमप्युपपादयति ब्रह्मचर्यादीति। सर्व एव सुवर्ण इति विशेषणाद्दृष्टानोरपि सुवर्णत्वे प्राप्ते प्रसाहतस्येति। विशे
चेन्न विदुषो भक्ष्याभक्ष्यविभागासिद्धौ तद्विषयं शास्त्रं विरुध्येतेत्याशंक्याध्यात्मिकं रूपं हित्वाधिदैविके
रूपे गतस्य सर्वान्नत्वे विभागशास्त्रमाध्यात्मिकपरिच्छेदविषयत्वेनाविरुद्धमित्याह प्राणात्मतत्त्वाभिज्ञा ति४
नामनो विद्वानित्यत्र श्रुत्यंतरं संवादयति। प्राणादीति प्राणविद्यागतेनान्नदृष्टिरूपदिष्टा संप्रति तद
वा गत्वेनैक्ये सो दृष्टिप्राप्तौ ति॥ सहोवाचेति। अत्रापि प्राणस्य प्रष्टृत्वं वागादीनां प्रति वक्तृत्वं च कल्पितमेव
त्याह एवं वै रिति। अपां प्राणे प्रातिवासोरूपत्वेन गमकमाह यस्मादिति वासो दृष्टिफलमाचष्टे लंभुक
इति। अनग्नोऽहम भवतीत्यस्यार्थं न हत्वेव माषामात्रं विप्रोऽपि समाहवास समइति। आचमनान्तं प्राणविदो
विधीयते एवंविद इति श्रोत्रियं आचामेदिति श्रुतेस्त्यागशंकामाह। मोक्ष्यमाण इत्यादिना। आदिपदेन पुनर्वचने णम०
ऽपेति। सर्वप्राणिभोज्येनेन स्याद्रात्राममिति दृष्टिवदाचमनीयास्वप्सु तस्य विधीयते वासोदृष्टिरित्यर्थं ८१
व्यतिरेकद्वारा विशेषो निषेध इति तात्पर्यं नानग्नातार्थत्वेनेति यावत्। अपूर्वमन्नदृष्टिरेव विधीयते सर्वो

ञमस्मरणस्य प्रमाणाविरुद्धत्वात्पूर्वमाचमनमविरोधाद्विधीयतामित्याशंक्याह तत्त्वयोरिति ॥ एकस्याचम
नस्य श्रुत्यर्थत्वमनन्यतार्थत्वं च वक्तुमशक्यं विरोधादित्याशंक्याह यत्त्विति । विरोधो यथा स्यात्तथेति यावत्
नहि क्रीयाचमनं विवक्षितमित्याह किं तर्हीति प्रयतस्य भावः प्रायत्यं तदर्थो याचमनक्रिया तत्साधनमतोस्य
प्लुवासः संकल्पनं क्रियांतरमत्र विधित्सितमित्याह प्रायत्ये तिक्रियाभेदफलितमाह तत्रेति । अन्यार्थोपस्मृ
अन्यार्थत्वचिंतने प्रमाणाविरोधाद्विधियोगेन वासोर्थेमाचमनानंतरमेव विधेयं तत्र चानन्यतार्थत्वचिंतनमु
चितमिति शंकार्थः ॥ वासोर्थापर्त्तौ चमनविधानेतत्रानन्यतार्थे दृष्टिविधाने चं वाक्यभेदप्रसंगात्प्रसि
द्धाचमनसाधनमनात्स्वप्लुवासोदृष्टिपरमेव च वाक्यमित्युत्तरमाह नेत्यादिना । वासोर्थत्वं त्वन्यार्थत्वं
च्छार्थत्वं दृष्टफले प्रमाणाभ्यैकस्य वाक्यस्य प्रमाणत्वप्रसंगादितियावत । तदुक्तं दित्यादिवाक्यं न विधानार्थेना
यिफलवचनं तथा चत्वर्थमित्याशंक्याह तद्वेतीयदिति । स्मृतिमेवप्रपर्व्वेकविवृणोति कथमिति । जीवतेपु
रुषायप्राणाविद्यावते एतद्दर्शनं ब्रूयात्तशखास्मिन्महाफलं भवतीति किमुवक्तव्यमिति योजना । गोदोहनेन
दधिकृताधिकारमिदं कर्म प्राणविदोस्मिन्नधिकारोस्तीत्याह । यद्योक्तेति । अनंतरं प्राणविद्यानिष्पत्तेरिति

श्रौ॰ से॰ टि॰ शेषः॥ वाक्यशेषं दर्शयति। तस्येति महत्त्वद्वारा विषयोपभोगकामुकस्य कर्मविधायि शास्त्रं श्येनादिशास्त्रवदनर्थफ
८१ लमेवेत्याशंक्याह॥ महत्त्वे हीति। तस्येति प्रकृतमंथाख्यकर्मोक्तिः कालादीत्यादिशब्दो द्रव्यादिसंग्रहार्थः। दे
श्यं दीक्षायां भवमौत्स्यंपंजनादिनस्सर्वमवायमनुतिष्ठति प्रकृतिधर्मा हि विकृतावनुवर्त्तंते प्रकृतिवद्वि
कृतिः कर्त्तव्येति न्यायात॥ न चेदं कर्म कस्यचिद्विकृतिरतो यथोक्तधर्मवत्त्वमेवात्र विवक्षितमित्यर्थः। दीक्षित
त्वेसनेन विवक्षितं धर्मांतरमाहोपसदीति। उपसदो नाम सेष्ट्यः प्रवर्ग्याहः सुप्रसिद्धाः तासु व्रतं पयोमात्र
भक्षणं तदुपेतो भक्तामंथसंपादयज्जुहोतीति वाजसनेयके समानप्रकरणोऽश्रवणादिति यावत्। पिष्टकृ
त्वात्तस्य मम पद्यमेवदधिमधुनोः संबंधं पात्रे प्रक्षिप्येति संबध्यः। औदुंबरत्वे नियमः पात्रस्याकारेत
विकल्पः कथमश्रुतं पात्रमत्र कल्प्यते तत्राह श्रुत्यंतरादिति। औदुंबरे कंसाकारे कंसे चमसे वेति वाजस
नेयेश्रवणात्सर्वशाखाप्रत्ययन्यायेनापेक्षितं पात्रमत्राह हीतमित्यर्थः॥ आवसथ्यसंबंधी लौकिको
ऽग्निरावसथ्यो विवक्षितो यस्मिन्नौपासनाख्यं कर्मक्रियते आज्यस्य हुत्वेति संबंधः। आवापस्थानमाहुति राम॰
प्रक्षेपप्रदेशो गृह्योक्तं वसिष्ठाय स्वाहेत्यादि वाक्यं पूर्ववाक्येन तुल्यार्थमित्याह समानमिति। तल्पसमे ८१

वसापयति। वसिष्ठायेति। स्वाहेतिमंत्रं समुच्चार्यहुत्वेतिसंबंधः॥ तथैवप्रथमहोमानंतरमित्यर्थः। आहुत्यानंतर्ये
मथशब्दार्थः नवतः प्राणस्येदंनाममंथस्यतत्कथंमंत्रार्थत्वमित्याशंक्याहान्नेनहीति। प्रतिज्ञातेर्थे संप्रश्नंहेतुमा
ह। कुतइति। अतश्चामोनामासीतिपूर्वेण संबंधः। हेतुंव्याचष्टेयस्मादिति। अनंतरंजयकर्मणः सकाशादितिशेषः।
तेस्वस्यापयति। मंत्रस्येति। मंत्रैकैकेनपादेनमंथस्यैकैकंग्रासंभक्षयतीतियोजना। भोजनेमंथरूपमितिसं
बंधः। नत्वयंसवितुः स्यात् प्राणस्याहिमंथद्रव्यमन्नमित्युक्तं तत्राह प्राणमिति। उच्यतेसवितुर्भोजनमितिशेषः
प्राणादित्ययोरेकत्वेफलितंवाकार्थमाहादित्यस्येति मंथरूपं तद्भोजनमिति पूर्वेण संबंधः॥ प्रार्थनाविषयंभो
जनमेवविशिनष्टि। येनेति। तस्यैवविशेषणांतरं श्रेष्ठमित्यादिस्त्रि तिकारणत्वमुक्त्वाजनकत्वंपक्षांतरमाह
तिशयेनेतिजगच्छष्टौ फलैः फलदानेध्यातुः श्रेष्ठंकिमितिभोजनेकथ्यमानेध्यानमुच्यतेतत्राह विशिष्टेतिबु
द्धीत्वंध्यानकारणमुक्त्वाप्रकृतकर्मवत्वेप्सितमहत्वेहेतुत्वात् पिध्यानमनुष्ठेयंरत्याहथवेति। सावित्रंरूपमुक्त्वेत्य
मेनोहंवरंवैकल्पिकाकारेविशेषः। पात्रंप्रक्षाल्यपिबतीतिसंबंधः॥ मंथलेपपात्रंप्रक्षाल्यपीत्वाचमनपूर्वक
मग्नेः पश्चिमभागे कृष्णाजिनेव्यवहितायांकेवलायांवाभूमौप्राक्शिरामलाशयीतेत्याह पीत्वेति। शयानस्यकर्त

२२

छां०दी०टि० वंदर्शयति।वाचंयमइति।तस्यस्वप्नेक्षं विद्युतमश्वीदर्शनेष्यु भागमः सच्यात उत्याह।सएवंभूत इति प्राणाविद्यानंदाक

८३ मेचेत्फलपूर्वं उक्तमिदानीमग्निविद्यामाख्यातुकामस्तावदाख्यायिकातात्पर्यमाह।ब्रह्मेत्यादि।तासांचवक्तव्यत्वे

हेतुमाह।वैराग्यहेतोरिति।राजाकुमारेतिसंबोधयन्नभिमानंश्वेतकेतोर्व्यनिनीषति।यथेत्यस्यार्थमाह येनेति।

विद्वदविदुषोरुक्तयोर्मार्गयोः सतोर्द्वैमार्गौतयोर्मध्येदेवयानस्पेत्यादिपोज्यं।।उक्तंवाक्यार्थंसंक्षिपति।इतोत

रेति।विदुषांचकर्मिणांचमार्गद्वयमधिकृत्यसहप्रस्थितानांयत्रमिथोवियोगोभवतितत्किंवेत्थेत्यर्थः।।पित

लोकसंबंधिनंलोकमेवव्याकरोतियंप्राप्नोतिआहुतानिवेत्थाइत्यस्यव्याख्यानमाहतिसाधनाभूतेतिअप

वेरूपाणामपांमंतांतरसमुच्चयार्थश्चकारः अप्यवाययोपघृताद्विरूपेणाहुतिसाधयेतीतिचाहुत्यापुनर

पवोत्मनानिष्यन्नाइत्यर्थःक्रमेणेतिश्रद्धासोमवृष्ट्यन्नरेतसांहवनद्वारेणेतियावत्।।षष्ठ्याहुतिमन्तानां

अंत्येष्टिविधानेनशारीराहुतिद्वारास्मशानंगतानामित्यर्थः।त्वस्यश्चार्थेज्ञातातिरिक्तविषयमनुशासनं राम०

ममास्तीत्यनुशिष्टोस्मीत्युक्तमित्याशंक्याह योहीति।अननुशिष्यत्वामन्वशिषमितिकथमुक्तवानसी ८३

त्याशंक्याह यतइतिनैकंचनेत्युक्तमेवनञ्पदेनाशंकमितिसंबंधंदर्शयित्वापुनरुपात्तंअतोमांप्रतित्व

मिथ्यावादित्वासिद्धेतिशेषः।पितास्वकीयमिथ्यावादित्वशंकांपरिहरतिसहोवाचेति॥यथामात्वमित्यादिव्या
कांपूर।पित्वाव्याख्यानंतर।वाक्यमाकांक्षापूर्वकमुच्छायमिथ्यावादित्वशंकांपरिहरतिसहोवाचेतिमु
ध्यात्वमित्यादिव्याख्यानंतरवाक्यमाकांक्षापूर्वकमु प्रति।कथमित्यादिनातद्व्याचष्टे।पथे
ति।अनातनाविशेषोशांतेः द्वार्थः अन्यथीथाभावोत्तानेपिविषयेतवानुक्तिरितियावत्॥त्वदीयमज्ञानंकु
तोहेतोर्मेयात्तातयामित्याशंकामुद्राव्यानंतरवाक्येनोजरमोहकुंतउत्पादिना।अतस्तवयात्रमतस्यानुपदे
शान्मदीयमज्ञानंज्ञानव्यामितिशेषः।अर्हणांपोगपापूजामित्यर्थः॥सभागयदंसम्प्रत्यंतंराज्ञोविषयंप्र
श्यमीतेगौतमविषयमितिभेदः।गौतममागतंयोराक्षेमार्थिनंबुध्वाराजाप्रसन्नःसन्नुक्तवानित्याह॥
तंहोवाचेति।तर्हिकुतनवक्ष्यस्यतवकिमित्यागमनमित्याशंक्याहयामेवेति।वक्ष्याभावमभिनयतिकिमि ध ४
तिगौतमस्यवचनंराज्ञोदुःखीभावकारणंवर्जैतामस्ताहिप्रत्याख्यायतामित्याशंक्याह।सहेति।किमिति
नाहेचिरंवसेत्युक्तवानित्यत आह।न्यायेनेतिसंवत्सरंवसेतियावत्तवक्तव्याविधेतिशेषः॥कथंराज्ञोब्रा
ह्मणंप्रत्याख्यानंकुर्वतोनप्रत्यवायः स्यादित्याशंक्याहयथास्र्वोमिति।प्रत्याख्यानादिविषयंहेतुवचनंनकेवलं

विद्यावशादेवश्रैष्ठ्यं किंतज्ज्ञानिनोपीत्यपेरर्थः।तर्हि किंबुद्धिनो वाचमित्याशंक्याह।नत्वेति।विद्याप्रवचने प्रसक्ते सती।
तियावत्।यथैतस्यापेक्षितं पश्यति।तथेति।प्रसिद्धमेवस्फोरयति तस्माद्दिति ब्राह्मणानामनयाविद्ययाप्रशा
स्तृत्वस्य प्रागभावादित्यावत्॥इतिशब्दोपात्तमर्थं कथयति।क्षत्रियेति।उक्तप्रख्यानाद्धिकारणमतः शब्दा
र्थः।ननु यथाप्रश्नमेव प्रतिवचनमुचितं पंचमं तु प्रश्नं प्राथम्येन प्रतिवदताक्रमो निराकृतस्तत्र किंकार
णमत आह।पंचम्यामिति।अर्थक्रममनुसृत्य पाठक्रमोभिधानमित्यर्थः।ननु वाजसनेयकेऽग्निहोत्रप्रक
रणोऽग्निहोत्राहुत्यपूर्वपरिणामं जगादुत्क्रांते देवेहापि विवक्ष्यत इति चेत्किमनेन पिष्टपेषणान्यायेनेत्या
शंक्यार्थभेदं वक्तुमग्निहोत्रप्रकरणास्थितमर्थमनुवदति।अग्निहोत्राहुत्योरिति।उक्तिप्रकारमेवप्रदर्श
यन्नप्रथमं याज्ञवल्क्यस्य जनकं प्रतिषट्प्रश्नाननुष्ठापयति।तं प्रतीति।कार्यारंभकमदृष्टद्वारार्थः॥अग्नि
होत्राहुत्यपूर्वपरिणामो जगदित्युक्ते तत्राग्निहोत्रे सायं प्रातश्चाहुतयोराहुत्योरस्माल्लोकादुत्क्रांतिरु
त्क्रांतयोः परलोकं प्रति गतिः।गतयोः तत्र प्रतिष्ठा।प्रतिष्ठितयोः स्वाश्रयेसंपाद्यमानात्तृप्तिः।तृप्तिमाया
घावस्थितयोः पुनरिमं लोकं प्रत्यावृत्तिः।आवृत्तयोराश्रयः पुमान्कथममुं लोकं प्रत्युत्थानशीलो भवती

तिकार्यारंभमधिकृत्यषट्प्रश्नाः प्रवृत्ताइत्यर्थः॥ तत्रैववाजसनेयकेयाज्ञवल्क्यंप्रतिजनकस्यप्रश्नवचनंद
र्शयति।तेषंचेति।अविरूपेखल्वाहुतीयजमानमुत्क्रामंतंपरिवेष्ट्योत्क्रामतस्तेचधूमाग्निनाजायमानेनांतरिक्षमा
विशतितदाश्रितत्वात्तदाविशतः।तेपुनरंतरिक्षस्ययजमानानुकूलत्वेनावस्थितेस्तस्यमंतरिक्षाधिकरणात्तदाहव
नीयमिवकुर्वातेआहुत्यधिकरणस्याहवनीयत्वात्तत्रवायुंसमिधमिवकुरुतोवायुनांतरिक्षस्यसमिध्यमानत्वा
त्शुक्लामाहुतीमिवमरीचीरेवाधत्तेमरीचीनांमंतरिक्षेव्याप्तत्वात्तेचांतरिक्षस्थेतत्तृप्तंयजमानंपूर्वलोकानुभव
मारब्धातेतेपुनरंतरिक्षादुत्क्रामतियजमानेसहोत्क्रामतोयजमानेचद्युलोकमाविशतिसहाविशतस्तमा
विश्यतमेवाहवनीयंकुर्वातेआदित्यंसमिधमित्याद्यंतरिक्षेवद्यदेवोक्तंप्रथमाहुतीयद्वदंतरिक्षंतर्पयत
उत्क्रामतस्थैवद्युलोकस्थयजमानंफलदानेनसुखिनमातन्वातेतेचारभ्यक्षयेततोद्युलोकाद्यजमानेप
थिवीमाविशत्यभूतेसहावर्त्तेतेय।पृथिवींचाविश्यव्रीह्यादिनाम्नान्नाश्रयेणैवपृथिव्यास्तस्मिंश्चपुरुषमाश्र
यद्वारेणाविशतःपुरुषाद्रेतोद्वाराद्वितीयांप्रकृतिमाविश्यगर्भीभूतेस्वाश्रयंकर्मानुष्ठानयोग्यंदेहमापि
नमापादयतस्ततोसौपारलौकिकंकर्मानुष्ठापयंतेलोकंप्रत्युत्थानशीलोभवतिइतिसर्वंजनकेनोक्तमित्यर्थः

२२

छां॰टी॰ तथापि कथमर्चिरादिसिद्धिरित्याशंक्योक्तमेव संक्षिप्याह । तत्रेति । वाजसनेयकं सप्तम्यर्थः । प्रकृतत्वेनेतरथा विशेषणं शेष श्र॰
८५ तीहखिन्ति ॥ पंचधा त्वपर्जन्यपृथिवीपुरुषयोषित्प्रकारेणेतियावत् ॥ पंचाग्निसंबंधमवतार्य प्रश्नमपयोपस्य तात्पर्यमा
हइहेति । अथ संप्रसन्नस्यार्थः । आहुत्योरप्सुमवायित्वासिद्ध्यर्थं विशिष्टानपि प्रश्नमाहेति । तयोः श्रद्धात्वसिद्ध्यर्थं प्रश्नप
रः स्वर्ग इत्युक्तं । तयोरधिकरणमग्निरित्यादिकल्पनोपयोगित्वेन विशेषणान्तरमाहेति । आहवनीयेति । तयोस्त्वांतं अं
परिहरति । कर्त्रादीति । अधिकरणशब्दो भावप्रधानो धर्मियरः । काल्पनिको द्युलोकाख्योऽग्निस्तत् । संबद्धमिति तद्
द्वोऽग्निविषयः । अन्यद्येत्युक्तं स्पष्टयति । समिदादीति । आदिशब्दो धूमार्चिरंगारादिविषयः । पर्यायतात्पर्यमु ।
क्तोऽक्षराणि व्याकरोति । असावित्यादिना इहेत्यन्तेन लोकनिर्देशः । पर्वतासंबंधनेन तदुक्ता नास्मिन्नेतस्मिन्नग्नि
गृहीतः । अध्यात्माधिदैवविभागेन देवानि शब्दयति । यजमानेति । प्रत्ययविशेषत्वेन श्रद्धाया होम्यत्वानुप
पत्तिरित्याशंक्य श्रद्धां व्याकरोति । अग्निहोत्रेति । किंच प्रश्नप्रतिवचनयोरेकार्थत्वात् प्रश्ने चापां होम्यतया श्र रामः
तत्वात् प्रतिवचनेऽपि ताः श्रद्धाशब्दिता होम्यतया विवक्षिता इत्याह । पंचम्यामिति ॥ अप्सु श्रद्धाशब्दस्य व ८५
द्दष्टवहारप्रयोगाभावान्नैवमित्याशंक्याह । श्रद्धेति । कथमापः श्रद्धाशब्देन प्रसिद्धवदुच्यन्ते तत्राह श्रद्धा

प

ति कार्यारंभमधिकृत्य षट् प्रश्नाः प्रवर्त्तन्ते इत्यर्थः॥ तत्रैव वाजसनेयके याज्ञवल्क्यं प्रति जनकस्य प्रश्नवचनं द्र
र्शयति। नेषं चेति। अग्निहोत्रे त्वं आहुती यजमानमुत्क्रामंतं यदि वेत्थ उत्क्रामतश्च धूमादिनाऽऽजायमानं तेंतरिक्षमा
विशतितदास्त्रिनत्वात्तदा विशतः। ते पुनरंतरिक्षस्य यजमानानुकूलत्वं यास्मिन् तेषां यमंतरिक्षाधिकरणोत दाहव
नीयमिव कुर्वाते। आहत्यधिकरणास्याहवनीयत्वात्तत्र वायुं समिधमिव कुरुतो वा पुनरंतरिक्षस्य समिध्यमानत्वा
त्वं सुद्धामाहुती मिव मरीचीरिवाधत्ते मरीचीनां मंतरिक्षे व्याप्तत्वात्ते चांतरिक्षस्थे तन्निष्ठं यजमानं पुनरनुव
मारुधाते ते पुनरंतरिक्षादुत्क्रामति यजमाने सहोत्क्रामतो यजमानेन च द्युलोकमाविशाति सहाविशतस्तमा।
विश्य तमेवाहवनीयं कुर्वाते। आदित्यं समिधमित्याधत्तेंतरिक्षे च पदे वोक्ते यथाऽऽहुती यवमंतरिक्षं तर्पयत
उत्क्रामन्तरथैव द्युलोकस्थं यजमानं पुनरदानेन सुखिनमानन्दयाते ते चाऽपि शुभे यतनो द्युलोकाद्यजमाने प्र।
थिवीमाविशात्य भ्रुते सहावर्ततैव। पृथिवी चाविश्य त्रीहास्तिनास्वाश्रयं प्नेषयित्वा ते तस्मिंश्च पुरुषमाश्र
यद्वारेणाविशतः पुरुषाग्नेरन्तो द्वारा द्वितीयां प्रकृतिमाविश्य गर्भस्ते स्वाश्रयं कर्मानुष्ठानयोग्यं देहमापि
नमापारयतस्ततो सौ पारलौकिकं कर्मानुष्ठापांते लोकं प्रत्युत्थानशीलो भवति इति संवेजनकेनोक्तमित्यर्थः

छां॰उ॰टि॰ तथापि कथमर्थभेदसिद्धिरित्याशंक्योक्तमेव संक्षिप्याह। नत्वेति। वाजसनेयिकं सप्रश्नस्यार्थः प्रकृतश्रुतेरर्थविशेषं दर्शय श्र॰
८५ तीहवि ति॥ पंचधा द्युपर्जन्यपृथिवीपुरुषयोषित्प्रकारैरिति यावत्॥ पंचाग्निसंबंधमवतार्य प्रथमपर्यायस्य तात्पर्यमा
हइहेति। अयं संप्रश्नस्यार्थः। आहुत्योरप्रमवायित्वासिद्ध्यर्थं विशिनष्टि पयआदीति। तयोः श्रद्धात्वसिद्ध्यर्थं श्रद्धाप
ः स्वदेऽस्यक्तं। तयोरधिकरणोऽग्निरित्यादिकल्पनोपयोगित्वेन विशेषणांतरमादत्ते। आहवनीयेति। तयोः स्वातंत्र्यं
परिहरति। कर्त्रादीति। अधिकरणशब्दो भावप्रधानो धर्मिपरः। काल्पनिकोफलोकाल्योऽग्निस्तत्। तत्संबद्धमिति तद्
द्धोऽपि विषयः। अन्यच्चेत्यक्तं स्पष्टयति। समिदादीति। आदिशब्दो धूमार्चिरंगारादिविषयः। पर्यायतात्पर्यमु
क्त्वाऽक्षराणि व्याकरोति। असावित्यादिना। इहेत्येतल्लोकनिर्देशः। पर्वत्वं संबध्यते तदुक्तं। नास्त्यत्र तच्छ्रुतेनाक्षिप्तो
ऽगृहीनः अध्यात्माधिदैवविभागेन देवान्निःशब्दयति। यजमानेति। प्रत्ययविशेषत्वेन श्रद्धाया होम्यत्वानुप
पत्तिरित्याशंक्य श्रद्धां व्याकरोति। अग्निहोत्रेति। किंच प्रश्नप्रतिवचनयोरेकार्थत्वात्प्रश्ने चापां होम्यतयाश्रु राम॰
तत्वात्प्रतिवचनेऽपि ताः श्रद्धाशब्दिता होम्यतया विवक्षिता इत्याह। पंचम्यामिति॥ अप्सु श्रद्धाशब्दस्य व ८५
द्धव्यवहारप्रयोगाभावान्नैवमित्याशंक्याह। श्रद्धेति। कथमापः श्रद्धाशब्देन प्रसिद्धवदुच्यंते तत्राह श्रद्धा

इति। श्रद्धापूर्वकहोमे मुमुक्षुप्रभृतयः सोमाज्यादिसाधनं संपाद्य जुहोतीति नैत्तिरीयकाः पठंति तथा चा कृश्रद्धा
शब्दः संभवतीत्यर्थः। उक्तमर्थं स्पष्टं तेन स्पष्टयति पद्येनाद्विना॥ उक्तं मधुविद्यायामिति शेषः चौद्धं कार्यैवं द्रुस
मीपस्थं तत्सदृशं शरीरमित्यर्थः। तथापि यजमानानां कथं फलित्वमत आह। यजमानाश्चेति। आहुतीति छन्दवा
च्ये प्राधान्येमयडर्थः॥ तद्देवस्य स्पष्टयति आहुतिभावनाभावितादृतिनान्सैनास्तत्वनुसारिणास्तदाश्रयाद्यर्थः॥ त
द्भावितत्वकसमाहाहुतिरूपेणेति। तेनाकृष्टत्वं वशीकृतत्वं॥ आहुतिभावितान्यक्तंस्पष्टयति। श्रद्धेति। तत्पूर्व
कंप्रयः सोमादिसाध्यं यत्कर्म तदाश्रयादित्यर्थः। सोमभक्तानां तत्समीपस्थं शरीरं प्राप्यन्तत्स्वरूपादित्यर्थः॥ क
थं सोमसाहचर्यं धर्मिणां फलमित्याशंक्याह। तदर्थमिति। यजमानानां सोमभावो गतिमंतरेणानसिध्यति त
था च वक्ष्यमाणगतिरित्याशंक्याहात्रेति। आहवनीयोग्निः समाप्तम्यर्थः सा न हि कुत्रोप्यतेन हितदुक्तिमंत
रेणापथोक्तफलं सिध्यत्यत आहतोस्विति। द्वितीयहोमसंबंधी द्वितीयः पर्यायः तस्यार्थे निर्दिष्टं तमेव
पर्यायमादत्ते अथेति। इत्यर्थः। पुरोवातादीत्यादिशब्देन वर्षहेतवो वायुभेदा उच्यंते। उक्तं चाश्वारोधे मकार्यंतं
पौराणिकैर्यज्ञधूमोद्भवं त्वभ्रं द्विजानां चाहितं सदा। दावाग्निधूमसंभूतमभ्रं वनहितं स्मृतं॥ मृतधूमोद्भ

छांदो टि
८६

वं तत्र मधुमाय भविष्यति। आमिचारात्स्निग्धमोहं भूतनाशाय वै द्विजा इति। अध्यात्मं यजमानस्य प्राणा इन्द्रा
दयस्त्वाधिदैवतं देवा इत्याह। एवं वक्ष्यति शोमं राजानमित्यादि व्याचष्टे॥ श्रद्धा व्या इति। तस्या आहुतेर्गर्भः सं
भवति अप्कृतं व्यक्तीकरोति एवमिति। यथोक्तपरीत्या श्रद्धादीनां रतो तानां यानि घूलोकादिषु पोषिर्दत्तेष
स्निषु हवनानि तेषामेकैकस्मिन पर्याये यः क्रमो व्याख्यातः तेनेति यावत कथं पुनरापोगभीभवंति भूतांतरा
णामपि तुल्योगाभो भावस्तस्य यां च भौतिकत्वात अन्न आहुतत्रेति॥ भूतानां मध्ये किमित्यपां प्राधान्यविवक्ष
यैषा निर्दिशस्ता तासामेव केवलानां कार्यारंभकत्वविवक्षा किं न स्यात्तत्राह नत्विति। भूतांतरासहकृतानां केवलाना
मपामारंभकत्वे यस्तु बुद्बुदं कार्यं न तदङ्गोगाय तस्य जलबुद्बुदवदत्यंतचंचलत्वादित्यर्थः॥ केवलानामप्समुपेता
कमिदानीं तद्देवनास्तीत्याह नचेति। इति शब्दस्तां सांत्रिवृतं त्रिवृतमेकैकामकरोदिति श्रुतेरिति हेत्वर्थः॥ स
त्वेस्य त्रिवृत्कृतत्वे कथं दृष्टो विशेषव्यपदेशो युज्यते इत्याशंक्याह त्रिवृत्कृतत्वेपीति। अपां प्राधान्यविव राम०
क्षया प्रश्नप्रतिवचनयोरप्शब्द इत्युक्तमुपसंहरति। तस्मादिति। केवलानामपामसत्वादित्यावत्कार ८६
थमारंभकेषु भूतेषु अपां बाहुल्यमवगतमित्याशंक्य कार्यद्वारा तदधिगतिमित्याह दृश्यते चेति। सोमादि

नामथाह स्मेपि कथं वाथिंवशरीरस्य तद्वाहत्य मित्याशंक्याह बहुदृंवंचेति। पंचमप्रश्ननिर्णयमुपसंहरन्नुपात
निकांकरोति। नत्रेति। योषाग्न्याविति यावत्। गर्भाभिमताः पुरुषवचसो भवंतीति संबंधः। उक्तार्थे वाक्यं योजय
ति। इतित्विति। अयं गर्भाभिवोक्ति मात्रे गोपुरुषवचस्त्वस्यानिर्णीतित्वास्त्वमस्तु रग्रे ग्रेनेत्याशंक्य तत्स्य तात्पर्य
माहयद्विति। आहुत्योः संबंधीति शेषः। आसंगिकं गर्भाभिवोक्ति प्रसंगादागतमिति यावत्। इहेति प्रकृतमनुस
क्तिः प्रासंगिकी संगतिस्त्यक्ता साक्षाद्देवपूर्वोत्तरग्रंथयोरस्ति संगतिरिति तात्पर्यांतरमाह इहचेति। प्रजानाम्
ध्वैगमनमुत्तरत्र विरूपतिष्ठते तादर्थ्येन तत्साम्यतिक्तिराद्यावुच्यत इत्यर्थः। द्विधा संगतिमुक्त्वा वाक्याक्षराणि
योजयति। स गर्भ इति। सोमवृष्ट्यन्नरेतांस्यथ्येक्ष्य पंचमत्वेन गर्भस्य परिणामस्यादृष्टत्वं। अयं प्रकृतत्व
द्योतनार्थमाहुतीत्यादिविशेषणद्वयं। अथवा पर्वोक्तात्कालान्न्यूनाधिकेनवाकालेन यावता जंतुः समग्रां
गोजापतेतावत्कालेन कुक्षौ शयित्वेति संबंधः। अनंतरं योनितो निर्गमनकारणीभूतकर्माभिव्यक्तेरिति
शेषः। उल्बावृतत्वं कुक्षौ चिरंशयनं योनितो निस्सरणमित्येतद्विशेषमतिप्रसिद्धं किमिति अन्वाख्यपक्षिप्य
तेन ज्ञाहोल्बावृत इत्यादीति वैराग्यार्थं लमस्य स्फुरयति। कष्टं हा ति। श्लेष्मादीत्यादिशब्देनास्य कृमयस्तासु

श्री०टी० मज्जादिविट्मूत्रस्रवत्ते ।। तद्दुर्लिप्तस्येति तच्छब्दो मूत्रपुरीषादिविषयः शक्तिर्बुद्धिसामर्थ्यं बलं देहसामर्थ्यं वीर्यमि
८० न्द्रियसामर्थ्यं तेजः शरीरगता कांतिः प्रज्ञा चेतना जीवनधर्मः चेष्टा प्राणधर्मः तानि रुद्धोपस्थानस्येति विग्रहः ।। मा
तुरुदरे शयानस्य कष्टं वेपितं दुःखं योनिद्वारानिःसरणं सुखं करोमीति चेन्नेत्याह नतउगि । तत्राह कस्त्वप्रकारमे
तृ वामिनयतिमुहूर्त्तमपीति । यस्मादंतः शयनं मुहूर्त्तमपि दुःसहं तत्कथं दीर्घकालं शायितं शाकोकथं चरदशवा
न्वेवमासानंतरं शापित्वा पुनर्योनिद्वारादुष्करं निःसरणं दुःसहं स्यादिति वैराग्यं ग्राहयति श्रुतिरित्यर्थः ।। जा
तस्य पुनरनर्थो नास्तीत्याशंक्याह सुरेवमिति यावदाप्रुषमित्येतदाचष्टे । पुनरिति । घटीयंत्रवद्दूर्ध्वगम
नार्थे वा निषिद्धं कर्म पौनः पुन्येनाचरन्पापकर्मणार्जितमायुस्तावदस्मिन्देहे जीवति ततो म्रियते तथा
च जातस्य मृत्युध्रुवत्वात्तन्नास्ति सम्यक्ज्ञानं विनास्त्वस्ति प्राप्तिरित्यर्थः । अस्तु तर्हि मृतस्य कृतकृत्यतेत्याशं
क्याह । तमेनमिति । सर्वस्य तर्हि मृतस्य परलोकित्वं स्यादिति चेन्नेत्याह । यदीति । तदा परलोकं प्रतिकर्मणा राम०
निर्दिष्टमिति प्रवैराग्यं बंधः सुकृतं च तस्मात्तस्याप्यर्थेन यत्नमित्याह । यतइति । स तुल्यावृत्तदृष्टास्तितोऽकमनु ८१
वदतिवे हो निप्रत्युपस्थितः प्रजोत्पत्तिप्रदर्शनेन प्रसंगात इतियावत ।। तद्धरक्त्यं विदुरित्येतदाचष्टे तत्र

त्रेत्यादिना। सप्तम्यर्थमेव स्पष्टयति। लोकमिति निर्द्धारणार्था षष्ठी वेदस्य प्रकारमनुवदति यस्तोकादीनिति वि
षममिसंभवंतीत्युत्तरत्र संबंधः॥ साधारणोक्ते विशेषे संकोचो हेतुं विना न सिध्यतीति शंकते। कथमिति।
पारिशेष्यं संकोचकमिति परिहरति॥ गृहस्थानामिति। षष्ठी निर्द्धारणे। तत्र चैव स्वकर्मिणां गृहस्थान
विदुरिति यद्गृहाणां महत्त्वेनेति शेषः। पारिव्राजकानां वानप्रस्थानां च गृहस्थानामिचेत तन्नेत्याह। येवेति। केषां तर्हि गृ
हिणामत आह पारिशेष्यादिति गृहस्थ एव हेत्वन्तरमाहाग्निहोत्रेति। तद्धाहुत्य पूर्वं परिणामात्मकं ज्ञा
पं दत्वैं च धाप्रविभज्याग्नित्वेन दर्शनमुत्तरमार्गेण्वाग्निमाधनं चोक्तं। ततो विद्यायास्तत्संबंधाद्गृहस्थाना
मपि न तत्संबंधस्य प्राप्तत्वात्तेषामेव गृहस्थानामुचितमित्यर्थः॥ पारिशेष्यमाक्षिपति। नन्विति। या
मेस्य पत्नीको वा सोऽन च ब्रह्मचारिणां पत्नीसंबंधः तत्र ग्राममप्यहत्या ब्रह्मचारिणोऽगृहान्नाध्रुकुर्वा
सित्वाप्युना रणयञ्चृत्या पत्नीरक्षितास्तत्र तेषामिहाग्निग्रहणासंभवात्तन्न पारिशेष्यमित्यर्थः। किंत्वै
ष्ठिकब्रह्मचारिणोऽत्रैष्वं विदुरिति गृहेण किं चोपकुर्वाणाऽति विकल्पादौ दूषयति। नैष दोष इति
। अष्टाशीतिसहस्राणामृषीणां नामऊर्ध्वरेतसां॥ स्मृतस्थानं तु यज्जेषां तदेव गुरुवासिनामित्यादि

२६

छां०टी० ८८ णतास्मृते: श्रुतिमूलत्वेन प्रामाण्यान्नैष्ठिकब्रह्मचारिणामूर्ध्वरेतसामादित्यसंबंधेनोत्तरायणेनोपलक्षितो दे
वयानाख्यो मार्गो पावनता प्रसिद्धिरित्यर्थः॥ तस्मात्तेषामरण्यवासिभिस्सहाविदितब्रह्मचर्येणोवाविरोधिगति
लाभान्नपंचाग्निवित्वेन प्रयोजनमिति पारिशेष्यसिद्धिरित्यर्थः॥ द्वितीयं प्रत्याह उपकुर्वाणकास्त्विति। ते स्वा
ध्यायग्रहणार्थाः तस्मिन्नाहिताः स्वेच्छावशादाश्रमांतरं गच्छंतः स्वतत्फलेनैव परवंतो भवंतीति न गृहस्थाद्विशेषो
विभज्यैषां विदुषामिति शेषमर्हतीत्यर्थः किंतु नैष्ठिकानां ब्रह्मचारिणां स्वजनाद्युत्तरमार्गप्राप्तिसंभवात् नैष्ठिकामिष्ठं
ष्टिसंप्राप्तं इति श्रुतिविरोधाद्द्वितीयेऽथ्या पारिशेष्यासिद्धिः तादवस्थ्यमिति शंकार्थः किमिष्टं वित्वं नैष्ठिकान्प्रत्यनर्थ
कमिष्यते किं वा सर्वानेव प्रतीति विकल्पाद्यमंगीकृत्याद्द्वितीयं दूषयति न गृहस्थानिति। तान्प्रत्यर्थवत्त्वमेवे
ष्टं वित्वस्य विभज्य समर्थयते ये गृहस्थाः इति स्वभावतस्तदनुष्ठितेष्टापूर्तेवलादित्यर्थः॥ तेषामेव गृहस्थानां
मध्ये ये केचिदुक्तेन प्रकारेणोक्तं पंचाग्निदर्शनं विदुरग्निभ्यो मद्यासमुत्पन्नां ब्रह्मविदुस्ते देवयानेनोत्तरायणथागच्छं राम० ८८
तीति संबंधः॥ न केवलं गृहस्थानां पंचाग्निविद्यामेवाकिंतु सगुणब्रह्मविद्यमायिनेषामस्तीति प्रमाणमाह
थे [illegible] त्युक्तिकरणाकरणयोरविशेषेणाब्रह्मविदामर्चिरादिगतिश्रवणाद्गृहस्थानामपि ब्रह्मविद्यमिति

गम्यते परिव्राजकादिषं सेघ्यसंभवेन विद्यास्क्ततेरपि दुर्वचनत्वादित्यर्थः॥ विहितत्वाविशेषादाश्रमाणां तुल्यत्वमापिक्रप
शंकते नन्विति। साम्यमुक्त्वास्फुटं स्त्वेषु विशेषं दर्शयति। अग्निहोत्रादीनीति वैदिकानि कर्माणि भस्मपांसि संति तेषां चत्वा
हुत्येसत्यविदुषामूर्ध्वरेतसामेव देवयानेन पथा गमनं नगरस्थानामित्यपुक्तं साधनमप्यस्त्येव फलमप्यस्त्वन्यापषि
तेषामादित्यर्थः॥ आश्रमित्वाविशेषेपि धर्मविशेषादिष्टसिद्धिरीरितमप्यसंभवान्नैकरूप्यमितिपरिहरति नेष
दोषइति। कथं गृहस्थानामग्निहोत्रादिमप्येवं धर्मेवतां विद्याहीनानामप्यपुनरावृत्तिं तत्राह शत्रुमित्रेति। अत्र ब्रह्मच
र्यादीत्यादिपदेन परिगृहीतानि गृह्यंते। अशुद्धिवाहुल्यकारणमतः शब्दार्थः॥ तद्वदूर्ध्वरेतसामपि स्मृद्धि
हेतुबाहुल्यादपुनरावृत्तिमित्याशंक्याह। हिंसेति। ऊर्ध्वरेतसां पतनेपि सिद्धफलितमाह। तेषामिति। ऊर्ध्वरेतसां देवया
नेपथ्यानुप्रवेशे प्रमाणमाह। तथा चेति। पौराणिकाः आहुरिति संबंधः। आश्रमधर्ममात्रमार्गोद्धारेणाम्
तत्वमूर्ध्वरेतसामुक्तमाक्षिपति इह विद्यामिति। तेषां विद्यानर्थक्यमिष्टमेवेत्याशंक्याह। तथा चेति स
परमात्मात्मस्वमस्त्रातस्सन्नेनमधिकारिणामपवर्गप्रदानेन पाल्यपतीव ववा केवं विद्यामंतरेणामृतत्वं ब्रुवतो
विरुद्धमित्यर्थः ऊर्ध्वरेतसाममृतत्वस्यापेक्षिकत्वान्न विद्यानर्थकमेवेति परिहरति। नामृतेति। आये

श्रीशं.टि. ८७ क्षिकममृतत्वमित्यत्र प्रमाणमाह। तत्रैवेति। यत्र प्रजाः कामयमाना मुक्तिभाजो न भवंतीत्युक्तं तत्रैव तत्सन्निधावित्यर्थः।
यावत्कथं तर्हि पथो जन्मश्रुतिविरोधसमाधिरित्याशंक्याह यद्वेति।। आदिशब्दस्तमेवं विद्वानमृत इह भवतीत्यादि
श्रुतिसंग्रहार्थः। आपेक्षिकामृतत्वे श्रुतिविरोधो न शंक्यते परिहृतं मितिपूर्वं कृतेन चेति। आदिशब्दस्तेषामिह न पु
नरावृत्तिरित्यादिवाक्यसंग्रहार्थः। इममिहेति विशेषणावष्टंभेन निराचष्टे नेत्यादिना तद्व्यतिरेकमुखेन विश
दयति। यदीति। सर्वकल्पेषु श्रुतेरेतादृशत्वादिममिहेति पदद्वयं सामान्येन सर्वकल्पविषये विशेषणान
र्थक्यं दुर्वारमित्युत्तरमाह। नानेति। वृत्तीति विधांतरेण विशेषणार्थसंभवे प्रश्नितमाह तदिति। यस्मिन्कल्पे
ब्रह्मलोकप्राप्तिस्तस्मात्कल्पांतरमन्यत्रेत्युक्तं। ऊर्ध्वरेतसामाश्रमधर्ममात्रनिष्ठानाममृतत्वमापेक्षिक
मुपक्षिप्तं संप्रति तेषामेव साक्षात्कृतब्रह्मतत्त्वानामात्यंतिकममृतत्वं गतिनिरपेक्षं सिध्यतीत्याह नचे
ती तिनेषां गत्यादिनिरपेक्षमात्यंतिकममृतत्वं भवेत्तत्र प्रमाणमाह। ब्रह्मैवेति। न तस्मात्प्राणा उत्क्रामं राम.
तीति माध्यंदिनश्रुतिमनुसृत्य न तस्येत्यादिकाण्वश्रुतिरपि नेतव्येति पूर्वं कृतेन न तस्मादिति। वाक्यशेष ८७
विरोधान्नैवमिति दूषयति। नात्रेति। श्रुत्यंतरालोचनायामपि न स्वपक्षकल्पनेत्याह। सर्वे प्राणा इति। प्राणो

सहजीवस्येति। शेषः संसारदशायां प्राणैः सहवित्तानात्मनो गमनेऽपि मोक्षे नास्ति प्राणानां जीवेन सह गमनमि
त्याशंकायां न तस्मादित्यादिवाक्यमित्याशंक्याह परायीति। अव तु प्राणानामत्रैव समवनयस्तथापि जीवस्य
गमनाय तममृतत्वमित्याशंक्याह। न चेति। कस्मिन्वहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठा
स्यामीति स प्राणमसृजतेति श्रुतेरिति शेषः। किंच प्राणैर्वियुक्तस्य चिदात्मनो जीवत्वं नोपपद्यते प्राणोपा
धिकस्यैव तस्य जीवशब्दवाच्यत्वादित्याह जीवत्वं चेति। उक्तमर्थं समर्थयते सर्वगतत्वादिति चिदात्मा हिरु
ल्पनायामधिष्ठाने सति घृतोनिभोगं सर्वस्यात्मा तस्माद्यग्नेर्विस्फुलिंगवज्जीवस्याव्यमेदसंपादनतस्य
प्राणैः संबंधमात्रमेवेति वैदिकानां प्रसिद्धं तथा च प्राणवियोगे चिदात्मनो जीवत्वं निर्वोन शक्यते कल्प्यपि
ष्टं तस्मात्सर्वगतत्वादिप्रतिपादकश्रुतीनां प्रमाणत्वादित्यर्थः॥ सदात्मनः सर्वगतस्य जीवाख्यमेदकरणानप्रा
णोपाधिकृतं किं तु स्वत एव तस्यांशो जीवस्तथाग्निविस्फुलिंगवत्तस्य गत्युपपत्तिरित्याशंक्याह न चेति। निष्क
लं निष्क्रियं शांतमित्यादिश्रुतेरिति शेषः प्रकरणार्थमुपसंहरति। तस्मादिति। निर्गुणब्रह्मविदामात्यंतिकाम्य
नत्वस्यागमनादिनिरपेक्षत्वादिति यावत्। सगुणब्रह्मोपासकस्य सापेक्षममृतत्वमित्यत्र विशेषणाश्र

छां.भा.टी. ९०

तिमन्तृत्वयति। तदपराजितेति। आदिपदेन तदश्वत्थः सोमसवनइत्यादि गृह्यते॥ तेषामेव ब्रह्मविदामेष पूर्वो
क्तविशेषगुणो ब्रह्मणः सत्याख्यस्य लोको नान्येषामकृतात्मनामिति विशेषदर्शनादमृतत्वं तेषां तल्लोकनिवा
सिभिः समं साध्येस्यमेवेति निर्द्धारितमित्यर्थः॥ ऊर्ध्वरेतसामाश्रममात्रनिष्ठानामपि ब्रह्मलोको लभ्यते गृह
स्थानां पुनर्विदुषामेवेत्यपवादप्रकृतश्रुतिव्याख्यानमनुवर्त्तयति। अतइति। पूर्वोक्तपारिशेष्यादिवशादितिया
वत्पारिव्राजकाश्रयमुख्यसंन्यासिनां नहि दृष्टेनोहं तेषु मुख्यसंन्यासिनां ब्रह्मसंस्थोऽमृतत्वमेतीति पृथक्कृतत्वा
त॥ श्रद्धां सत्यमित्युपासत इति श्रुत्यंतरं यं चाग्निविदोऽगृहस्थाः स्वाश्रममात्रप्रवणा ऊर्ध्वरेतसः सत्यब्रह्मेपि
सकाश्रोमपये सर्वशब्देनोच्यंते॥ चतुर्थे यदुपकोसलविद्यायां गतिव्याख्यानमतिरजं तेन समानमर्चिषोऽहरि
त्यादिवाक्यव्याख्यानं तथा च तत्पथ कर्त्तव्यमित्याह समानमिति। उत्तरमार्गव्याख्यानमुपसंहरति। एष दे
ति। देवयानेन यथाविहितं शास्त्रवाक्ये स्थितं ब्रह्म गंतव्यमित्येके तान्प्रत्याह। नांतरादिति तत्र हेतुमाह यदंतरेति १७०
९ पितरं द्युलोकं मातरं च पृथिवीं मध्ये ये द्वे सृती आश्वंताभ्यामिदं विश्वं कर्मज्ञानाधिकृतं गच्छति न चांतर्ब
हिरस्ति गतिद्वयमित्यर्थः। वेत्थ यदितोधि प्रजाः प्रयंत्यस्य प्रश्नस्य प्रतिवचनं देवयानोपदेशेन व्याख्यातं से

प्रतिषिद्धत्वान्नोपदेशेनापि ग्रामनिवासित्वाविशेषादित्याशंक्याह ग्राम इतीति। सपत्नीको ऽग्निवासो ग्राम इत्युच्यते नेन च सप
त्नीकत्वमध्वरेतसां च पुत्रं तथा च गृहस्थानामेव ग्रामविशेषणमसाध्वरेणां न च तत्पत्नत्वमध्वरेतोभ्यस्तेषां व्याव
र्त्यत्वादित्यर्थः॥ तदेव दृष्टांतेन स्फुटयति। यथेति। वेधंतमो वृक्षमेधाङ्ग हिवेदीति विशेषणा। आदौ स्त्रमिति प्र
नीकोपासनं पुनराख्यातस्यानुवाद इत्यपुनरुक्तिः इति शब्दार्थमाह इत्येवंविधमिति यापि चरणं गुर्वाद्युपासा
पि श्रावणारक्षणादिपरं नित्यसाध्या यादिसंयमार्थे। उपासनेनात्यये गान्तु निर्गच्छतीति यावत्। कथमिति शब्दस्याय
थोक्तार्थत्वमिति हस्मै पाध्यायः कथयतीति वस्त्रवृत मात्रगामित्वादित्याशंक्याहेति शब्दस्येति देवयानाधिक
नेभ्यः सकाशात्पितृयाणाधिकृतेषु विशेषांतरमाह नैतदिति अप्राप्तप्रतिषेधोयमिति शंकते कुत इति प्राप्ति
दर्शयन्नुत्तरमाहास्तिहीति। एवं वधूयावदेवयानेन यथावयवेभ्यो वपविनः संवत्सरस्य प्राप्तिस्तथेति या
वत्। अत्र शब्दस्य यथाश्रुतमर्थं गृहीत्वा चोदयति नन्विति। औपचारिकमर्थं गृहीत्वा परिहरति। नैष दो
ष इति। वस्तुप्रयोगमंतरेण कथमुपकारणविषयपात्रशब्दो व्याख्यायते नेतत्राह दृष्टश्चेति। भवतु कर्मिणां देवान्य
त्युपकरणत्वं तथापि स्वयमुपयोगाभावादनर्थकमिष्टादिकरणमित्याशंक्याह नचेति। आत्मोपभोग्यानाम

पित्वपंभोगसत्वंतस्मादिष्टदुच्यते। तथापितेषां स्वर्गतानामशरीरिणां कथं सुखोपभोगः संभवतीत्याशंक्याह शरीरं चेति। क्र-
श्रमयां चंद्रलोके तद्देहारंभकत्वं तदाहतद्रुक्तमिति। अथायांसोमस्तमेवात्रप्रतीयतेनतु कर्मिदेहारंभकत्वमित्याशंक्या-
ह। ता आपइति। कर्मसमवायिनीनामपांकर्मोपनिबद्धत्वाद्यजमानदेहप्रतिष्ठानां कथं धूमलोकप्रवेशादि संभवतीत्याशं-
क्याह। तास्तासां चेति। प्राप्तिरात्र्यस्यशरीरस्य भोगायतनत्वं दर्शयति तदाहुरितेनेति। तद्देवानामन्नमित्यादिश्रुत्या व्याख्यात-
मित्यादिश्रुत्या च प्रतीयावस्थितिः। चंद्रलोके तत्र उच्छ्वासार्थः। यावत्संपातमुषित्वेति श्रूयते कथमन्यथा व्याख्यायते तत्रा-
ह। संपतंतीति। पुनः शब्दप्रयोगस्य तात्पर्यमाह पुनरितिश्रूयते त्वादिवाक्यार्थमुपसंहरति। तस्मादिति। तच्छब्दप-
रामृष्टं हेतुं स्पष्टयति स्थितिरिति। यथादीपस्य स्नेहक्षयेऽस्थितिर्निमित्ताभावादस्थितिस्तथा चंद्रलोकेऽस्थिति-
निमित्तस्येष्टादेर्भोगेन क्षयात्तत्रास्थित्यसंभवादावर्त्तिरेवेत्यर्थः। तास्मिन्यावत्संपातमुषित्वेत्यत्र विचारयति त-
त्रेति। तस्य चंद्रमंडलप्राप्तकस्यातिरिक्तस्य च सर्वस्य कर्मणः क्षयेसति। निःयावत्सावशेषो भुक्तावकर्मणः सकाशा-
दिति। केनचित् कर्मणा सहितः सानुशय इत्यर्थः। पक्षद्वयेपि फलं पृच्छति किंततइति। तत्राद्यं पक्षं पूर्वपक्षमुखेन प्रतिवि-
क्षिप्य द्वितीयमाह। यदीति। तत्रैव दूषणांतरमाह निवर्त्तितेति चंद्रमंडलं सप्रमस्यार्थः। ततश्चंद्रमंडलादित्येततः। इहे

त्येतच्छ्लोकोक्तिः। आदिपदं स्मृ मा प्रभुक्ति कर्मानु शापि सर्वकर्माधारसंग्रहार्थो। न केवलं सर्वकर्मक्षयपक्षे मुक्तिरेव विरुध्यते
किंतु दृष्टनिरुद्धं त्याह तत्तनद्रति। चंद्रलोके भोक्तव्यस्य कर्मणो भोगेन क्षयादूर्ध्वं शेषे सत्यनुपभुक्तेन कर्मणा जन्मप्रति
पद्यते इत्यादावुक्ताः स्मृतिः सर्वकर्मक्षयपक्षे विरुध्यत इत्यर्थः॥ सर्वकर्मक्षयपक्षे पूर्वपक्षि सम्मतमन्यथावाच्छिन्नाप्र
तिष्ठिते सावशेषपक्षमुत्तरवादी प्रतिपद्यते न च्चितिति। नन्वपि चंद्रमंडले भुक्तान्येव तेन निरवशेषोक्ती त्याशंक्याह न
चेति। न हि सर्वकर्मवशात्चंद्रमंडलप्राप्तिरिति भावः। न हि चंद्रमंडले कर्मफलोपभोगाभावाद्लंतदारोहो त्याशंक्या
ह यत्त्रिमित्तमिति। अविशेषश्चंद्रमंडले भोगास्पशेषकर्मसद्भावस्य चेति शेषः। यद्भतत्तः शेषे सत्यादि दृष्टिविरोधः इ
ति तत्राह शेषशब्दश्चेति निःशेषेष्वपि भुक्तेषु कर्मसु अभुक्तकर्मसु शेषशब्दो न विरुध्यते भुक्तानां कर्मणां कर्मत्वस्य
त्यक्तत्वात्तेन अनुमानशेषपक्षे दृष्टतिविरोधोक्तीत्यर्थः। यद्वा चंद्रमंडलस्थस्यैव मोक्षः स्यादिति तत्राह न स्वेति। शेष
कर्मसद्भावाद्देवेति यावत्॥ उत्तमप्रकर्मशेषसिद्धिरित्याह॥ विरुद्धेति। आदां न कर्तृत्व संभवादेकजन्मोपभोग्यकर्मक्षये
पि कर्मशेषः संभवतीति शेषः। अथैकस्मिन् जन्मनि सर्वो प्रारब्धीयंते कर्माशयस्यैकभविकत्वादित्याशंक्याह न चे
ति। एकभविकस्याय स्वोपपादिप्राधिनि रागद्वारिध्यमा गालादित्यर्थः॥ उत्तमप्रशेषकर्मसिद्धिरित्याह॥ ब्रह्महत्यादेश्चेतिश्च

छां॰ भा॰ टी॰ ५२ स्वदुःखरोषाणामित्यादिस्मरणं घृतभांडस्नेहशेषवत्तमुक्तस्यैव कर्मणः शेषात्पुनरावृत्तिर्भविष्यतीत्यत आह। स्थावरादी
ति। शेषकर्मसिद्धौ हेत्वंतरमाह गर्भस्थानामिति। कर्मशेषसद्भावमुपसंहरति। तस्मादिति॥ एकस्यापि कर्मणोऽनेकजन्महे
तुत्वे तच्छब्दार्थः॥ मतांतरमुत्थापयति। परिहति। यावत्प्रवृत्तफलं कर्म न क्षीयते तावदस्योत्पत्तिप्रतिबंधादन्यानि कर्माणि
स्वफलं नारभंते मरणकाले तु प्रतिबंधकाभावात्सर्वकर्माण्युपसंघातोपमर्देनैतेषामुत्तरशरीरारंभकत्वमविरुद्ध
मित्यर्थः। तथापि कथं शेषकर्मसद्भावासिद्धिरित्यत आह तत्रेति। अनारब्धकर्मणां सर्वेषामुत्तरशरीरारंभकत्वेऽम
नीतियावत्। प्रायणकाले यानि कर्माणि अभिव्यक्तानि तान्येवोत्तरशरीरारंभकाणि तानीतरेषां तु न शरीरारंभकत्वमिति
दूषयति। नरसादिति। मधुब्राह्मणोक्तेन न्यायेन सर्वस्य सर्वात्मकत्वांगीकाराद्देहस्यापि तथात्वान्नसर्वात्मनोपमर्दो
पपत्तिरित्यर्थः। उक्तमर्थमुपपादयितुं सामान्यन्यायमाह नहीति सर्वं सर्वस्य कारणं कार्यं चेति न्यायेन सर्वास्यस
र्वात्मकत्वेऽपि तेषां तत्कस्यचित्क्वचित्सर्वात्मनोपमर्दः तथाभिव्यक्तिर्वा नोपपद्यते प्रतीयमानोपमर्दो देशे
विशेषादिकृतत्वादित्यर्थः। उक्तं न्यायं प्रकृते योजयति। तथेति। इत्थं च कर्मशेषः संभवतीति क्रमवज्जातीयदृष्टांत राम॰ ५२
माह। यथा चेति। एवं क्रमेणानुभूतानि यानि मनुष्यादिजन्मानि तैरभिसंस्कृताः संयादित्वाद्विरुद्धापाभयस्या

कर्म

वासनासंज्ञातिविशेषप्रायकेनकर्मणातस्मिन्नारभ्यमाणेनतिरुध्यंतइत्यर्थः।दार्ष्टांतिकमाह।तथेति।दृष्टांतंवि
वृणोति।यद्दिहीति।व्यवहितवासनोछेदेपिनाव्यवहितदेशोछिद्यतेतथाचानंतरजन्मोद्भवावासनासामर्थ्यान्मर्कटे
शिशोर्यथोक्तकौशलमविरुद्धमित्याशंक्याह।नचेतिकिंचपर्वेप्रभावेत्यविशेषेणापर्वेजन्मार्जितवासनाजीवमनुगछ
तीतिप्रवणादव्यवहितपर्वेजन्मवासनैवतमन्वेतीतिनप्राक्तंविशेषसेतुमित्याह।तंविद्येति।दृष्टांतमुपयाघप्र
र्थेतिकंनिगमयति।तस्मादिति।शेषकर्मसद्भावेफलितमाह।यतइति।उपभुक्तात्कर्मणःशेषेणेतिसंबंधः।कष्ठि
रितिश्रौतोवास्मार्त्तोवार्थोक्तिकोवाक्तेकिकोवेत्यर्थः।एतमेवार्थ्यानमितिप्रकृतमध्यानंप्रमुपर्वेक्तंविशदयति।
कोमात्विन्यादिना।यथेतमित्युक्तमाक्षिपति।नन्विति।किंयथेतमित्यनेनदेवनसंभवतिकिंवायथेतमेवेतिनियमोनोपप
द्यतेनेत्याद्यंदूषयति।नैषदोषइति।द्वितीयंप्रत्याह।नचेति।अत्रेतिनिवृत्तिरुक्ता।अनेनेवंविधमपीतिपर्यागतिक्रमोदर्शितोन
तथानिवृत्तिर्नियमाः किंतुविधांतरेणापिसंभवतीत्यर्थः।निवृत्तेःक्रमनियमाभावेकोदृशोनियमोविवक्षितइत्याशंक्या
हपुनरिति।केनाभिप्रायेणातर्हियथेतमित्युक्तमतआहातइति।गतिक्रमवन्निवृत्तिक्रमेनियमाभावोऽतःशब्दार्थः॥
उक्तंचयथेतमनेवंचेति।निवृत्तिनियमेफलितमाहातइति।परमात्मानंव्यावर्त्तयितुंभौतिकमित्युक्तं॥कथंपर्वेस्मि

३१

छांभा.टी. काशतातात्स्यापत्तिरवरोहतांसिध्यतीत्याशंक्य तत्साम्यगमनमेव तद्भावापत्तिरित्युपचर्यते साभाव्यापत्तिरितित्यादि
९२ त्याह।यास्त्वेषामिति।एतत्स्यंसस्थेयस्यानंकाठिन्यं।तास्वाकाशसतासुतत्सरिवेष्टितास्केमितोध्यवरोहंतत्तद्भूताद्भवमवं
तीत्यर्थः।आकाशाद्वायुमित्यस्यार्थं साधयतितात्र्यंतरिक्षादिति।उक्तेतेषुसमुद्रादिष्वास्थितेषु प्रदेशेष्विति यावत्।तद्भनु
शयिनोनिर्दिश्यंत।इहेतिपृथिवीकथ्यते।कृष्यमस्मिन्वाक्येबहुवचनेनानुशयिनांबहुत्वानिर्देशः कृतइत्यर्थः।कथंतं
हिमेघोभूत्वाप्रवर्षतीत्यादावेकवचननिर्देशः तत्राह।मेघादिष्विति।पूर्वैमेघादयोनभोंतास्तेप्रत्येकमभिमानिदे
वतानामेकरूपत्वात्तदुपश्लिष्टानामनुशयिनामप्येकवचनेननिर्देशोयुक्तइत्यर्थः॥अतोवैखलुदुर्निष्प्रपतरमित्यादिवाक्यं
व्याचष्टे।यस्मादिति।अनुशयिनांदुःशकंनिःसरणमित्युक्तंप्रपंचयति।यतइत्यादिना।मकरादिभिर्भक्षिता
नामनुशयिनांतेभ्यस्तत्समानजातीयत्वेनसमुद्भवोभविष्यतीतिचेन्नेत्याह।तेषामिति।मकरादयोपिजलचारि
भिरन्यैर्भक्ष्यंते तथाचसमुद्रेप्रपतितानामनुशयिनांतत्रैवलयः स्यादित्यर्थः॥नन्वेवमत्रनुशयिनःसमुद्रे
लीनाः नपुनरुद्धर्तुंशक्यंतेतथाचकृतविनाशः स्यादित्यतआह।जलधेरिति।समुद्रांभोभिरितित्वतीयासहा राम०
र्थे।तर्हिसर्पव्याघ्रोपभुक्तानामनुशयिनांतत्समानजातीयदेहभोगः स्यादितिचेन्नेत्याह।भक्षितास्त्रेतियदिहि ९२

सपोरयोभस्यंततेभ्यस्तत्समानजातीयत्वेनानुशयिनामुद्भवः स्यादितिचेन्नेत्याहतेपीति।तथापियथोक्तनीत्यापरि
कर्तनान्नैरेतःसिग्योगाभपियदाकदाचित्प्रपद्येरन्नितिचेन्नेत्याह।कस्यचिदिति।तथापिभक्ष्येषुजातानांरेतःसिग्योग
:सुलभःस्यादितिचेन्नेत्याह।भक्ष्येष्वपीति।इतिशब्दोयतशब्देनपूर्वेणासंबध्यते।एवंमतःश्राद्धेहेतुपरतयाव्याख्या
तःसंप्रतिव्री।ह्याद्यवधिवाचकत्वेनतेव्याचष्टे॥अथवेति।इतिःयततरमितितकारसहितेपाठेसतिविवक्षितार्थमाह॥
व्रीहियवादीति।तत्रहेतुमाह यस्मादिति।नहितेषांमंतरत्वेविशेषणानांदैर्भाग्यत्वाभावादनुशयवैयर्थ्यमित्याशं
क्यहिकस्यचिदिति।काकतालीयन्यायवत्त्याद्वृष्टिकल्पायनेनेतियावत्।अनुशयानामसकृद्योगाभावेदिहारेभायेसा
तमुख्यप्रश्नपूर्वकंविवृणोति।कथमित्यादिना॥अनुशयिनोरेतःसिग्योगस्यहेतुमाह।रेतसइति।तस्यरेतःसिग्
कृत्यातद्दर्शनभावितत्वात्संस्कृतत्वान्नरंगसंभृतत्वात्तद्रूपेणगर्भाशयमनुप्रविष्टोनुशयीरेतःसिग्कृतिर्भवती
त्यर्थः॥रेतसोरेतःसिग्गांसमनुष्यत्वेप्रमाणमैतरेयकश्रुतिरित्याहसर्वेभ्यइति।रेतोरूपेणगर्भाशयंप्रविष्टस्यरेतः
सिग्कारत्वमुक्तंनिगमयति।अतइति।अनुशयिनोरेतःसिग्कारत्वेयौक्तिकानुभवमनुकूलयति।तथेति।च
इस्थलसवलितानांअवरोहतांव्रीह्यादिदेहसंश्लिष्टानांद्राघीयसाकालेनदेहांतरलाभश्रोतोहिव्रीह्यादिदेहा ह

छां॰भा॰टी॰ ९५

मिमानिनामपि दुःखं शाकं निःक्रमणं व्रीह्यादिदेहसंबंधाविशेषादित्याक्षिप्त आह। यैरिति व्रीह्यादिदेहसंबंधे विशेषे कुत्त।
स्तद्देहभाजां ततो निःसरणमशक्यं न भवतीत्याशंक्य विशेषमाह कस्मादित्यादिना। शरीरजैः कर्मदोषैर्यातिस्थावर
तां नरः इत्यादिस्मृतिस्मरणात्पापैर्येषां कर्मनिमित्तं स्थावरजन्म तेषां कर्मक्षय एवावधिरेवरोहस्यान्तु कर्मासंकीर्णेनाद्विषम्यपि
त्यर्थः॥ यथा जलूकात्तृणात्तृणांतरं दीर्घमतासंक्रमते न तथानुशयिनो व्रीह्यादिदेहभाजोपितत्त्यागेन देहांतरंग
च्छंति तद्विषयविज्ञानवंत एव न गच्छंतीत्यत्र बृहदारण्यकश्रुतिं प्रमाणयति। सविज्ञानइति। अथोपसंहृतकरणानां
विज्ञानेकारणासंभवात्कथं सविज्ञानत्वं तत्राह। यद्यपीति। इंद्रियकरणाभावेपि स्वप्नमेवैकं वासनात्मकं ज्ञानं तेषा
तौ निमित्तमिति तेन सविज्ञाना एव गच्छंति देहांतरमित्यत्र हेतुमाह। श्रुतिप्रामाण्यादिति श्रुतिरत्र बृहदारण्यकं।
श्रुतिः। यथा सविज्ञानमेव व्रीह्यादिदेहांतरगमनं तथाज्ञानिनामर्चिरादिना कर्मिणां धूमादिना च गमनं स्वप्नवदुद्
द्धवासनात्मकविज्ञानेन सविज्ञानानामेवेत्याह तथेति तेषां सविज्ञानत्वे हेतुमाह लब्धवृत्ती ति। अनुशयिनामपि त ராम॰ ९५
र्हि व्रीह्यादिसंश्लिष्टानां रेतःसिगादिदेहसंबंधः सविज्ञानानामेवेति चेन्नेत्याह न तथेति। अनुपपत्तौ हेतुमाह नहीति
ति व्रीह्यादिसंश्लिष्टानामनुशयिनां सविज्ञानत्वेन व्रीहिवनादौ तज्जी। वनवत्तेर्यास्यपि प्रवासप्रसंगात्तेन रेतःसि

ह संबंधः सिध्येदित्यर्थः। व्रीह्यादिषु देहान्तरं गच्छतस्सविज्ञानत्वो यत्वं भाव्यं न शायिष्वपि देहांतरप्राप्तेरविशेषाद्धुमे
सविज्ञानत्वमिति शंकते। नन्विति। तत्रागतानंतरं प्रतिजलदकागमनवदवरोहतामपि देहांतरं प्रतिगमनस्य तुल्यत्वा
द्व्रीह्यादिवधुक्ता सविज्ञानतेति योजना। अस्तु तेषां सविज्ञानत्वं काहानिरित्यत आह तथा सतीति। इष्टादिकारिणा
मतरालेन रकानुभवे तथा चेति तदनुष्ठानस्यानर्थार्थे विहितत्वे श्रेयःसाधनविषयककर्मकांडं विरुध्येतेत्याह। अ
नेश्चेति यथा वृक्षं प्रत्येकं वृक्षमारोहतां सविज्ञानत्वेपि तस्मात् बुद्धिपूर्वकं यतनात्र सविज्ञानत्वं विज्ञायते तथा चंद्र
मंडलमारोहतां सविज्ञानत्वेपि ततोवरोहतां नैव तत्सुकृतकर्माभावादित्याह। अवरोहयोर्ज्ञानविशेषसंभवान्नि
वमिति परिहरति। नैष इति संग्रहवाक्यं विवृणोति। देहादित्यादिनाचकाराद्दृष्टांतोसविज्ञानत्वं संभवेदिति संघा
वरोहतां जीवानां सर्वथा विज्ञानशून्यत्वमयुक्तं तेषां चैतन्यस्याभावान्न वृक्षान्तरानामपि विज्ञानमात्रमस्त्येवा
न्याशंक्योदाहरणांतरमाह यथा चेति। तेन मुदाराश्निना योभिघातस्तेन हेतुना यद्वेदनाख्यं निमित्तं तेन संमूर्छि
तानि संहृतानि प्रतिबद्धानि वाकरणानि येषां तेषामिति पावतामद्दितो भिन्नो देहो ममपतः स्थूलो देहोपेक्षात
नस्ववप्रतिबद्धकरणानां पुंसां विज्ञानशून्यतेति संबंधः। यथोक्तदृष्टांतवशात् दुमंडलादवरोहतां विज्ञानशून्यां

३३

षं.भा.टी सिध्यंतीति निगमयति । अत इति । तथापि समुच्छिन्नानां स्थूलदेहसद्भावाद् देशांतरगमनं पुनः समवरोहणं तत् कथं
८५ विज्ञानादिभावः संभवतीत्यत आह । अथ परित्यक्तेति । न यदि त्यक्तदेहभावस्य बीजकर्मोपवेष्टाभिरद्भिस्ताभिरुपहिता
षि जीवा समुच्छिन्नवद्विज्ञाना अम्बुयागगनादिक्रमेणापि पृथिवीं प्राप्य कर्मफलभुक्तजातिस्थावरशरीरैः संश्लिष्यत इति
संबंधः ॥ स्थावरदेहसंबंधित्वादुक्तजीववत्तदा स विज्ञानत्वं संभवतीत्याशंक्याह । प्रतिबद्धेति । व्रीह्यादिसंश्ले
षावस्थायामनुशायिनां कर्मणोऽनुद्भूतवृत्तित्वात्करणानां च तत्तद्वृत्तित्वाभावादनुभूतविज्ञानत्वं पुनः मित्यर्थः ॥
न केवलं व्रीह्यादिसंश्लेषकालेऽनुद्भूतविज्ञानत्वं किं तु व्रीह्यादेर्भक्षणादिकालेऽपीत्याह । तथेति । पाकसंस्कारः रसा
दीत्यादिशब्देन शोणितमांसमेदोऽस्थिमज्जारेतांसि उच्यंते ॥ तस्मिन्काले संमूर्छितत्वादनुद्भूतविज्ञानत्वे देहाद्बहिर्निर्ग ८५
तानां प्रारब्धेहोतरं प्राप्तेस्तु दृष्टमेव निहेतुमाह ॥ देहेति । अलब्धवृत्तित्वादिति छेदः ॥ कथं पुनरनुशायिनां विज्ञान
मस्पष्टत्वेन यथा तृणजलौकायुकात्तृणस्यांतं गत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरतीत्यादौ सचेतना जलूका
दृष्टांतत्वेनोपादीयते तत्राह । देहबीजमिति । सर्वोऽस्य वस्थास्वनाद्व्रीह्यादिसंश्लेषणतद्भक्षणादिवशायित्वमत्र

तानचेतनात्वं जलूकादृष्टांते विवक्षितं किं तु सातत्यमात्रमिति भावः। जलूकावत्त्वं जलूकासादृश्यमनुशयिनामित्यर्थे
:। आरोहतां सविज्ञानत्वमवरोहतां विज्ञानराहित्यमित्युपपादयति आरोहतामपि यामत्त्वस्थानेभ्यः करणान्युपसंहृत्य हृ
दयेवस्थानं तावदेव सविज्ञानत्वेन दृष्टा छेदृहिशिखिनो नानाभ्राम्यहांतरथ्यामेत्तरस्यानुशयिनां तु चंद्रमंडलादवरोहे
स्तनामपि नभाविदोहपर्वतावासनादौ घो भवति प्रमाणाभावात्संक्षेत्याहांतरालेपि तिनि। चंद्रमंडलादवरोहतां देहा
तरारंभनस्यत्सुदृश्यत्वेपि विज्ञानशून्यत्वमदुष्टमित्युपसंहरति इत्यदोषइति। यत्तु हिंसानुग्रहात्मकत्वाद्दृष्टादिक
र्मणां स्थावरत्वमपि तत्फलमेव तस्माच्चैदिकानां कर्मणामनर्थानुबंधित्वादप्रामाण्यं श्रुतेरिति तत्राह न
चेति। उभयहेतुत्वमर्थानर्थहेतुत्वमिति यावत्। अहिंस्यात्सर्वाभूतानीति श्रुतेः शास्त्रचोदितवैदिकेषु कर्मसु हिंसा
नानर्थहेतुः। इत्याह भूयानि तेषीति। यद्यपि स्वरूपेणाहिंसानर्थहेतुस्तथापि गम्यते तथापि तद्युक्तानां वैदिका
नां कर्मणां नानर्थारंभकत्वं यथा स्वरूपेणाविषदध्यादेर्मरणादिहेतुत्वेपि मंत्रपूरणादिभिः सहोपयुक्तस्य न क
तत्कार्यारंभकत्वं तथा हिंसायाः स्वतोधर्महेतुत्वेपि वैदिककर्मनिष्ठाया नानर्थहेतुत्वं वैदिकैरेव कर्मभिस्तत्फला
दोषापनयाद्युक्तंसत्र सिद्धेरित्यर्थः। एवमिति मेवत्यांतं तत्पूरयति। मंत्रेरौति। तेन सहोपयुक्तस्य विषस्यानर्था

छां.भा.टी. हेतुत्वेन पुण्यहेतुत्ववद्देहादिकं धर्मोनुप्रविष्टाया हिंसायाः पुरुषार्थत्वमेवासिद्धमिति चेन्न शास्त्रादित्याह। पापा रिप्यर्थे।गातद्द
१५६ पथत्वमभवती त्येतत्प्रसंगागतं परिसमाप्य प्रकृतश्रुतिव्याख्यानमनुवर्त्तयति। तत्र चेति। अन्यायिष्विति पूर्ववत्।
मिलायादिति न्यायेन तेषु व्रीह्यादिषु संश्लिष्टा ये नुशयिनः। तेषां मध्ये ये के चिदस्मिल्लोके चंक्रमं स्नान प्राप्तः प्राप
वस्थायामनुष्ठिता भुक्त रमणीय चरणास्ते रमणीयां योनिमापद्येरन्निति संबंधः। उक्तमेव स्पष्टयति। शोभ
नइति॥ कथं रमणीयचरणानुरोधेन शोभनो नु शयो लक्ष्यते तत्राह। क्रौर्येति। तेषु खल्वमुं नुशयिनो रोतस्मि पोणा
नंतरं तेन कर्मणा रमणीयां योनिमापद्येरन्निति हेतुमाह। यतस्तापि क्षिप्रं यथैवेति योजना। तत्राविहेतुमाह। स्वक
र्मेति योनिविकल्पे तृतीयं पंथानमवतारयितुं पूर्वौक्तौ पंथानौ संक्षिप्यानुवदति येतिति। शुभानुशयवशाद्धि के
विद्वास्मणादियोनिमापद्यन्ते स्ववर्णाश्रमविहितकर्मनिष्ठाः संतोपर्येष्टापूर्तादिकर्मकृतवंतस्तत्र दक्षिणेनाय
थाचंद्रं गच्छंति तत्र च भोक्तव्यकर्मणि भोगेनेक्षितो पुनः स्वप्रिष्ठेन कर्मणा पृथिवीमागच्छंत्येवं घटीयंत्रवद्व
त्युनः पुनरारोहंतो वरोहंतश्चैके कल्पकर्मिणोरदर्शयं तेचेतरद्विजातयः स्वकर्मस्थाः संतोध्यात्मं लमेरं भुत्तरे
णाया नेने तो ब्रह्मलोकं गच्छंतीत्यर्थः। इदानीं तृतीयस्थानमुपदिशति। यदाविति। यौनः पुन्ये लोपामध्यमे

कवचनान्तयोः सर्वाख्यातेषु विधानात्पुनः पुनर्जायंते म्रियंते चेत्यस्मिन्नर्थे जायस्व म्रियस्वेति प्रयोगः इत्याह तेषामिति। यद्य
सर्वैश्वरो मार्गद्वयभ्रष्टं दृष्ट्वा तं जायस्व म्रियस्वेति प्रेरयत्येत दित्युच्यत इति द्रष्टव्यं॥ तेनासावित्यादिना कां व्याचष्टे। चे
नैवेति। उक्तयानीत्यानिर्णीतान्प्रश्नान्विविच्य प्रतिपत्तिसौकर्यार्थं कथयति। पंचमस्त्विति। व्याकर्ने ~~सम्यसिस्वाकां~~
~~ध्यायचष्टे। ये~~ नैवेति। उक्तयानी~~त्या~~निर्णीतान्~~प्रश्ना~~नपि व्याख्याते त्यज्ञस्य संबंधः। मृतानामविदुषां विदुषां चेत्यर्थे
।अंत्येष्ट्यनंतरं विदुषां कर्मिणां च संवत्सरमिति ज्ञानिनोपरहंते॥ अन्ये पितृलोकमिति केवलकर्मिणां इति विभागः
ः क्षीणानुशयानां चंद्रलोके भोक्तव्यकर्मभोगेन क्षपितवतामिति यावत्। स्वशब्दमेवानुवदति। तेनेति। किमर्थ
मेषां महायासवती संसारगतिरुक्तेत्याशंक्याह। यस्मादिति। तृतीयस्थानस्य कष्टत्वं स्पष्टयति। यस्माद्व्रीहिज
न्मादिना जनिता यावेदनानंतरनुभवेक्षणः क्षणो वसरो नान्यत्र येषां तथ्या। इष्ठवधृतिश्छेदः। त्ती। यस्थानवदि
तरयोरावृत्तिमत्वात्कष्टत्वमित्याह तस्माज्जुगुप्सेति। संसारात्प्रत्यवरागनस्य तात्पर्यमुक्त्वा पंचाग्निवि
धायामनुष्ठानसिध्यर्थं तस्य स्तावकं श्लोकमुदाहरतीत्यव्याचष्टे॥ तदेतस्मिन्नित्यादिना। पंचाग्निविधामाहा
त्म्यसमस्यार्थः। पंचमहापातकिनः श्लोके निर्दिश्यते तेन तु पंचाग्निविधास्तुतिरिहभातीत्याशंक्याह। अथे

३५

छां·भा·टी ति। पृष्टत्वेहेतुमाह तेनेति कस्येदं फलमित्यपेक्षायां पूर्वोक्तविद्यावंतमनुवदति य एवमिति। पूर्वोत्तरसंदर्भयोः संबंधं दर्शे
५७ यन्नुत्तरसंदर्भमवतारयति। दक्षिणेनेत्यादिना। उत्तरग्रंथस्य वैश्वानराख्यात्मभावप्रतिपत्त्यर्थत्वे गमकमाहात्मी
ति विद्यायाः संप्रदाननियमस्य न्यायो विनयादिसंपत्तिस्तत्प्रदर्शनार्थाचाख्यायिका दृश्यते चात्र प्राचीनशा
लप्रभृतीनां तत्संपत्तिरित्याह विद्येति। कथमात्मब्रह्मशब्दयोरितरेतरविशेषणविशेष्यत्वं व्यावर्त्याभावस्त्या
शंक्याह। ब्रह्मेतीति। उक्तरीत्या मिथो विशेषणविशेष्यत्वे फलितमाह भेदेनेति। इतश्चोपास्यस्य सर्वात्मत्वं गम्य
ते परिच्छिन्नोपासनस्यानिंदितत्वात्समस्तः क्रतुवत्तज्यायस्त्वमिति न्यायादित्याह। मूर्द्धेति। भगवंतः स्वतः संपाद
यांचक्रुरिति पूर्वेणासंबंधः॥ अश्वपतिरित्यादे भगवंत इति प्राचीनशालप्रभृतयः संबोध्यंते। स हेत्यादिसो
पस्कारं व्याचष्टे॥ महाशालेत्यादिना। यथोक्तं शास्त्रप्रसिद्धमिति यावत्। किं तर्हि भगवतागमनस्य प्रयोजनं
तत्राह। वेत्स्यंचेति। तत्र मापि नास्तीति शंकां निरस्यति आत्मानमिति। शिष्यभावेनोपसन्नेभ्यो विद्यादातव्या रम०
न यथा कथंचिदिति राज्ञोऽभिप्रायः। ते हेत्यादिवाक्यस्य तात्पर्यं दर्शयति। यत इति। योगक्षेमार्थं राजानं प्रत्यु ५७
पगमनमिष्टमेवेति मत्वा नो विशिनष्टि विद्यार्थिन इति। न चोपेत्य ब्राह्मणैः शूद्रो दृष्टव्यः। उपनयनं यादृपोनिय

नावक्ष्यमाणां वैश्वानरविद्यानंतेनैतदित्यस्य संबंध इति यावत्। आख्यायिकातात्पर्यमुपसंहरति। यथेति। शिष्यो
हि प्रष्टा आचार्यस्तु प्रतिवक्तेति न्यायेन शंकते। नन्विति। वाक्यशेषावष्टंभेन दूषयति नैष दोष इति। बृहदारण्यक
श्रुत्यालोचनायामपि नैतदस्त्याख्यमित्याहान्यत्रापीति। आचार्यस्याजातशत्रोरिति संबंधः। तस्यात्मबोहेतु
माहात्म्यनद्रति। एकाहादिरूपो ज्योतिष्टोमादिरहर्गणास्तत्र सुतं सोमरूपं तत्ताद्रूप्यमहीने प्रसुतं सत्रे त्वासुत
मिति भेदः। तवेति पुनर्वचनमन्वयदर्शनार्थं। न केवलं प्राचीनशालनिष्ठमिदं फलं किंतु त्वत्कुलस्यापि भवती
त्याहान्वयीति। न हि यथोक्तवैश्वानरज्ञो नादेवकृतं तत्कुलं त्वेतावाशंक्याह मूर्द्धा त्विति। अक्षरार्थमुक्त्वा विवक्षि
तार्थमाह साध्विति। अथ प्राचीनशालेत्यादि तूष्णींभूते जिज्ञासमाने सत्यनंतरमित्यर्थः। आदित्यस्य शुक्लत्वा
दिरूपत्वमष्टमे स्पष्टीभविष्यति। तस्य सर्वरूपत्वेन विश्वरूपत्वमुक्तमुपपादयति। सर्वाणीति। अन्नमत्र
मित्यादिविशेषणं कृतमित्यतः प्राणमिति शेषः। चक्षुष्ट्वेनादित्यादिवाक्यं व्याचष्टे। चक्षुरित्यादिना। तत्रापि ना
त्येयेयथा पूर्वं द्रष्टव्यमित्याह एवमिति। सत्ययज्ञो परमानंतरमित्यर्थे शब्दार्थः। पृथगिति सतः प्राकृतमा
त्यियरेन गृहीतं पृथक् सर्पेति प्रतीकमादाय व्याचष्टे नानेति। आभिमुख्येनागच्छत्वा वहतस्तेन पृथग्वर्त्मा

३६

छां॰भा॰टी॰ त्वामित्यादि व्याचष्टे। तस्मादिति। नानारिक्षा नानाविधा सदस्युम्बा इत्येतत्। अत्स्यन्नमित्यादि समानमित्युक्तमादिप
५८ स्मुपात्तपन्नवाक्यसंग्रहार्थं। उत्तरवाक्येष्वपि प्रायसाम्यं मत्वा हस्त्वाभ्यामस्त्विति। इंद्रद्युम्नोपमानं तयेमथत्राह्यर्थः। अ
त्रापि पदमेषइत्याद्यस्मात्प्रागुक्तवाक्यसंग्रहार्थं कथमाकाशस्य बहुलत्वमतआह। बहुलत्वामिति। कथं शरीरस्य मध्य
मेभागे संज्ञापदवाची संदेहशब्दो वर्त्तते तत्राह संदेह इति। आकाशस्य सर्वगतत्वेन बहुलत्वाद्देहस्य परिच्छिन्नत्वेन
तदभावात्कथमाकाशं वैश्वानरस्य शरीरं स्यादित्याशंक्याह। मांसेति। तच्छरीरमिति संबंधः। जनस्योपमानं त
रयथशब्दार्थः। कथमस्यात्मको वैश्वानरो रयिरातुधनेन निर्दिश्यते तत्राह। अप इति। आपुष्टत्वमिति वक्तव्ये
वाचकेन प्राकारतां लक्ष्यत इत्यर्थः॥ तस्मादघशोऽन्ये वैश्वानरोपासनादित्येतत्स्वरूपवैश्वानरोपासनात्धन
वानित्येवमुक्ते कथं पुष्टिमानित्यधिकावाप्तस्तत्राह पुष्टिमांश्चेति। सत्याश्चापोधनं चैतौ वस्तिशिरमिधीयत इत्यापण
येनाह। वस्तिरिति। प्राचीनशालप्रभृतिषु पंचसु मौनमातिष्ठमानेष्वनंतरमित्यथशब्दार्थः। उद्दालकांतेषु वि राम॰
द्यार्थिष्वपसन्नेषु महास्यैव वैश्वानरविद्यावक्तुकामस्तेषां मिथ्याज्ञानमनुवदति तानित्यादिना। अनर्थकाविद्वान ५८
र्थकौ नियातौ न त्वनर्थकावेव तेषां मिथ्याज्ञानत्वप्रसिद्धिस्मारकत्वाद्यमित्यन्वयार्थे ज्ञातुमुक्तमपि पाठक्रमेरा

पुनरन्नस्य यथैव विद्वान्स इति संबंधः॥ यथा जात्यंधा हस्तिस्पर्शेन भिन्नदृष्टयो भवंतीति तथा यूयं वैश्वानरमात्मानमेक
मपि सर्वात्मकं संतं भिन्नमिव विद्वांसः यतिछिन्नाद्यरूपेणात्मानं बुद्धवंतः तथा च मिथ्यादर्शिनो यूयं प्रागेव प्रत्यवाया
न्नाभागतवंतः साधु कृतवंत इत्यर्थः। अर्थेन विद्यावक्तुं पातनिकां कृत्वा तामिदानीमुपदिशति। यस्त्वेतमित्यादिना एतमे
वं स्वरूपं कृत्वा यास्ते सर्वैः सत्रमतीति संबंधः॥ एवं शब्दार्थमाह यथोक्तेति। एकं समस्तं त्रैलोक्यात्मकमिति यावत्
॥ प्रादेशमात्रमित्येतद्विभजते प्रदेशैरिति यथोक्तैस्तद्धिदैविकैरवयवैर्ध्यातं प्रत्यगात्मन्येवायं मीयत इति व्यु
त्पत्त्या प्रादेशमात्रं तमिति यावत्। प्रकारांतरेणात्मा चष्टे मुखादिष्विति। तेषु हि प्रदेशेष्वयमकर्तृत्वेन साक्षित
यामीयत इति व्युत्पत्त्या तथोच्यत इत्यर्थः॥ विधांतरेणाव्याचष्टे घुलोकादीति। अर्थांतरमाह। प्रकर्षेणेति। आमने
तिचैनमस्मिन्निति न्यायेन पक्षांतरमाह। शाखांतरे चेति। श्रूयते ह्येतज्जाबालश्रुत्यनुसारेणामूर्द्धानमारभ्याधा
रफलकपर्यंते देहावयवे संपादितो वैश्वानरः प्रादेशमात्र इति नेत्याह इहत्वेति। सर्वात्मत्वेन वैश्वानरस्योपसंहारद
र्शनाच्चात्र जाबालश्रुतिरनुसर्तव्येत्यर्थः॥ विशेषणांतरं व्याचष्टे। प्रत्यगात्मतयेति। सर्वेश्वरत्वं सर्वात्मत्वं सर्वप्रवृ
त्त्वं वा हेतूकृत्य वैश्वानरशब्दमनेकधा व्याकरोति विश्वानित्यादिना। ईश्वरो वैश्वानर इत्यत्र वैश्वानरस्य दमुभय

छां०भा०टी त्रसंबंध्यते।सवैश्वानरविरत्रमदस्सर्वेषुलोकादिषुस्थितत्वात्रमत्तीतिसंबंधः।कथमात्मशब्देनशरीरादयोगृह्यंतेतत्रा
९९ ह।तेषुहीति।सर्वेषुलोकेष्वित्यादिवाक्यस्यतात्पर्यार्थंदर्शयति।वैश्वानरविदिति।वैश्वानरोपासकः।सर्वात्मासन्न
न्नमत्तीत्येवंकस्माद्धेतोर्निश्चितमित्याशंकामनूद्यहेतुप्रदर्शनपरत्वेनोत्तरत्वेनोत्तरवाक्यमुपादत्तेकस्मादित्यादिना
।वैत्मासन्नन्नमत्तीत्येवंकस्माद्धेतोर्निश्चितमित्याशंकामनूद्यहेतुप्रदर्शनपरत्वेनोत्तरत्वेनोत्तरंवाक्यमुपादत्ते
कस्मादित्यादिना।वैश्वानरस्येति।सर्वात्मत्वात्तदुपासकस्यापितदात्मतयासर्वात्मत्वादसौसर्वात्मभूतःसर्वेष्वन्न
मत्तीतियुक्तमित्यर्थः।।तस्येत्यादिवाक्यस्यतात्पर्यमाहप्राग्वेति।प्रधानविद्यामुक्त्वानतदंगप्राणाग्निहोत्रंद
र्शयितुकामोभूमिकांकरोति।।अथेति।संपादयितुमिष्टत्वादौत्तदंगान्यस्यतिराहेत्यर्थः।वेदिरिति।स्थंडिलमा
त्रेणच्यते।अग्निहोत्रेनावभ्रात्रस्योपयुक्तत्वादितरस्यदर्शपूर्णमासाद्यंगत्वाद्वेधामास्तीर्येनेयेदर्भोबर्हिःशब्दे
नोच्यंते।हृदयस्याहितयत्यत्वंमनःप्रणयनहेतुत्वात्प्रणीतमुपत्वन्निमवेत्यर्थः।।आहवनीयसादृश्यंचमुखस्यदर्श राम०
यतिआहवनीयइति।एवंसतीत्यादिकस्यापेनाग्निहोत्रेसंपादितेसतीत्यर्थः।संपादितस्याग्निहोत्रस्याग्निहोत्रत्वस्यसा ९९
मान्यादन्यद्गुणातरीतितदंगायत्रभवेदित्याशंक्यतद्बुद्धिमात्रस्यविवक्षितत्वान्नैवमित्याहाग्निहोत्रेति।इत्येतिवेषा

नरविदे भोजनमुच्यते प्रकृते भगवता वांतरविभागमाह सभोजनेति। कथमिमं मंत्रो वा द्रव्यपरिमाणं वा फलं वा पश्यते तत्त्वप्र
थमं प्रत्याह प्राणायेति। यदि द्वितीयस्तत्राह। हुतीति। अवदानस्य प्रमाणपरिमाणं कर्मणा प्रमाणं प्रसिद्धत्वेन परिमित
मिति यावत् तृतीयस्त्वेत्त्राह। तेनेति। भुंजानस्य स्वदेहप्रत्यक्षं प्रमाणं प्राणादेरस्त्वेन शास्त्रमिति विभागमभिप्रेत्याह। प्र
त्यक्षमिति। प्रजादिमिष्टमोक्षफलं प्याप्तीति संबंधः। प्रसिद्धाग्निहोत्रनिदर्शनद्वारेण वैश्वानरविदोपयोक्तमग्निहोत्रमवश्य
कर्तव्यतायै स्तौतीति स य इदमविद्वानित्यादिना। प्राणाग्निहोत्रस्यैव विशेषेह स्तुत्यंतरमतःशब्दोपात्तं प्रश्नपूर्वकं प्रकटयति
।कथमित्यादिना नैयमिकाग्निहोत्रनिदर्शनद्वारा प्राणाग्निहोत्रफलस्तुत्यनंतरं विधांतरेण तस्यैव निरवद्यता कीर्त्यते इत्य
थशब्दार्थः॥ एतदिति वैश्वानरदर्शनमुक्तं। सर्वमिति वैश्वानरस्योक्तसर्वात्मकत्वादिप्रकारेणेत्यर्थः। अग्निहो
त्रमिति सांपादिकमग्निहोत्रं गृह्यते। कथमिदमुक्तार्थं सर्वेषु लोकादिष्वन्नमत्तीति वाक्यं व्याख्यातं तस्य सर्वेषु
लोकादिषु हुतं भवतीत्यस्य दृष्टामिदं वाक्यं तत्राह हुतमिति। इतश्च वैश्वानरविद्यावतोऽग्निहोत्रं विशिष्टमिति
वक्तुं वैश्वानरविद्यां स्तौति किंचेति। तत्र वैश्वानरविद्यामहात्म्ये दृष्टांत इति यावत् इषीकायां मुंजमध्यवर्त्तिन्या
स्यैत्येतत्सर्वशब्दव्याख्या। ब्रह्मकर्मणोपि दाहसाम्यं व्याह वर्त्तमानेति। वैश्वानरविद्यायामहाफलत्वे सिद्धे तद्वतो निहे

२८

छां॰भा॰टी॰ १००

त्रं विशिष्यमिति तत्कर्तुः सर्वदोषास्पर्शित्वमित्याशयेनाह। य एतदिति। विद्यामेवं विद्यास्तौति द्वाराऽग्निहोत्रमिति यावत्।
तत्प्रयुक्तेऽग्निहोत्रस्य स्तुतिरूपो योऽर्थः तस्मिन्नित्येतत्। मंत्रस्य तात्पर्यार्थं दर्शयति जगदिति। विदुषो वैश्वानरात्मजः सर्वात्मत्वमि-
त्यर्थः॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानंदपूज्यपादशिष्यभगवदानंदज्ञानकृतायां छांदोग्यभाष्यटीका-
यां पंचमोऽध्यायः समाप्तः ॥ ॥ श्रीशुभमस्तु ॥ ॥ श्रीगोपालकृष्णाय नमः ॥ श्रीसदाशिवाय नमः ॥ श्रीरामचं-
द्राय नमः ॥ ॥ वाजिब्राह्मणाध्यायस्यानंतरेण संदर्भेणास्य संबंधं वक्तुं प्रतीकं गृहीत्वा तं प्रतिजानीते श्वेतकेतुरिति। तमेव
प्रकटयन्प्रथमं तृतीयेनाध्यायेनास्य संबंधं कथयति सर्वमिति। एतद्वृत्तांतरूपोऽयं षष्ठोऽध्याय आरभ्यत इति
संबंधः। व्यवहितसंबंधमुक्त्वाऽव्यवहितं तमादर्शयति अनंतरं चेति। अध्यायतात्पर्यमुक्त्वाऽऽख्यायिकातात्पर्यमा-
ह पितेति। पिता प्रतिवक्ता पुत्रश्च प्रष्टेत्येवं विधेयमाख्यायिका सा च विद्यायाः सारिष्ठत्वद्योतनार्था। पिता हि पुत्रा-
यसारतरमेवोपदिशतीत्यर्थः। कुलस्यानुरूपमित्यादिवचनान्न कुलाधमस्य गुरुत्वमिति गम्यते। ब्रह्मचर्यम- राम॰ १००
ध्ययनार्थमिति शेषः। गत्वेत्यादिवचनान्माणवकाधीनमध्ययनमिति सूचितं। माभूदुपनयनमध्ययनं केवलं
शंकाहनचैनमुक्तमिति। किमिति पिता स्वयमेवोपनीय पुत्रं नाध्यापयति तत्राह तस्येति। अतः शब्दः स्वार्हविषयः।

अनुमानं कल्पनं व्याहृतं चैतद्युक्तमिति।।किमिति पिता स्वयमेवोपनीय पुत्रं नाध्यापयतीति तत्राह तस्येति।अतः शब्दः प्रवो
हि विषयः।अनुमानं कल्पनं व्याख्यानेन कल्पकमाह येनेति।अनन्वयानोनुवचनसमर्थः।कर्मे व्युत्पत्त्या करणात्युत्पत्त्याचाद्दे।
शशब्दो व्याख्यातः।।किमित्यधीतसर्ववेदमधिगततदर्थं च पुत्रमात्मविद्यामधिकृत्य पिता पृच्छतितस्य सर्ववेदाध्ययना
दिनैव कृतार्थत्वादित्याशंक्याह सर्वानपीति।तदेतदद्भुतेष्वाभिलाहेत्यतंक्षिपतीति।कथं खल्विति मन्मयमित्यस्यैवाभ्य व्या ४
द्विकारजातमिति।नघथाम्रतिंदेन विज्ञानेन विज्ञातं स्यात्तथान्यदपि सर्वं कारणेन विज्ञातेन तद्विकारजातं विज्ञातं भ
वतीति योजना।अन्यविज्ञानादन्यविज्ञानमदृष्टत्वादप्रसिद्धमिति शंकते कथमिति कार्यकारणयोरन्यत्वासिद्धेरेव
मिति परिहरति।नैष दोष इति तदेव स्फुटयति यथान्यमन्यसदृश्यादिना।अन्यताभावे लोकप्रसिद्धिविरोधं शंकते कथं
नहीति।वाचारंभणमित्यत्र वाचेति नित्तेी यासप्तम्यर्थे द्रष्टव्या।नामधेयमित्यस्यार्थं कथयति नाम्नैवेति विकारस्य मि
थ्यात्वे किं परमार्थतोस्तीत्याशंक्याह।मृत्तिकेत्येवेति एकेनैव दृष्टांतेन विवक्षितार्थसिद्धौ किमनेकदृष्टांतोपादानेनेत्या
शंक्याहानेकेति।न वा इत्याक्षिपती कमादाय प्राचष्टे भगवंत इति तेषामज्ञाने हेतुमाह।यदीत्यादिना।ननु श्वेतकेतोर्गु
णामज्ञानमाचक्षाणो गुरुद्रोही प्रत्यवायी स्यादित्याशंक्याह वाच्यमपीति।गुरूणामज्ञानमतः शब्दार्थः।पक्षि

छां॰भा॰टी॰ १०१ नेन सर्वे विज्ञानं लभ्यते तद्विज्ञायनं प्रतिज्ञातं प्रकटीकर्तुं प्रथमं सर्वस्य सन्मात्रत्वं प्रतिजानीते सदेवेति। सच्छब्दस्य सामान्य
विषयत्वं व्युदस्यति सदिती। तस्य घटादिभ्यो विशेषं दर्शयति सूक्ष्ममिति। आकाशादिभ्यो विशेषमाह। निर्विशे
षमिति। अन्यविशेषविशेषमाह सर्वगतमिति। तस्यैतादृशस्य व्यावर्त्यत्वमेकमिति। प्रत्यगभिन्नस्य तस्य संसारित्ववार
यति निरंजनमिति। निष्क्रियत्वेन कूटस्थत्वमाह निरवयवमिति। यथोक्तवस्तुनि प्रमाणमाह। यदवगम्यत इति। विशे
षणानुसारेणाशंकते किं नेदानीमिति। वर्त्तमानदशायामसत्त्वं जगतो नास्तीत्याह नेति सदा सत्त्वाद्विशेषविशेषणान
निर्वहतीति शंकते कथमिति किं विशेषणासामर्थ्यादिदानीमसत्त्वं जगतः प्रोच्यते किं वा विशेषणस्यार्थवत्त्वं प्रख्या
नेनज्ञाघं हृषयतीदानीमपीति। अर्ध्यस्य विरोधात्र वर्त्तमानावस्थायां जगदसत्त्वसिद्धिरित्यर्थः। इतीयं प्रत्या
हर्किं स्थितियद्वेदं वर्त्तमानं जगन्नामरूपविशेषणावदालक्ष्यते तेनादिदं शब्दस्य तद्बुद्धेश्च विषयभावेन स्थितमभव राम॰ १०१
तीति। त्वेदमिदमिदानीमित्यपि व्यवह्रियते तदेवं तदग्रे प्रागुत्पत्तेः सच्छब्दस्य तद्बुद्धेश्चैतावन्मात्रगम्यमेवनाभि
दंशब्दस्य तद्बुद्धेश्च विषयो भवति। अग्रे सदेवेदमासीदित्यवधार्यते तस्माद्विशेषणाभिदं शब्दबुद्धिव्यावृत्त्यपेक्षं
प्राक्कालीने जगत्यविरुद्धमित्यर्थः। अथावर्त्तमानावस्थायामपि जगतः सत्त्वे किमितिति तत्रेदं शब्दबुद्धीनक्रमेतत्र

न आह। नहीति। यथा सुषुप्ते काले सत्यपि वस्तुनि संस्कारवद्बुध्योः गोचरस्तथा प्रागुत्पत्तेः सदपि जगन्नामवत्त्वेन रूपवत्त्वेन च रू
मिति न व्यवहर्त्तुं शक्यं कारणोपसंहारस्योभयत्र तुल्यत्वादित्यर्थः। सुषुप्ते पि वस्तुनो न सत्वं मानाभावादित्याशंक्याह यथे
ति नहि तत्र वस्तुनोऽसत्वमुच्यते तस्य परामर्शादनुभूतस्यानुभवितृस्वाभावे तद्योगात् किन्तु तत्र विभक्तत्वं वस्तुरूपयते ह
पुरुष्य भावप्रसंगात् तस्तत्र केवलसन्मात्रं व[illegible]ति यथा वा गमस्तथा प्रागुत्पत्तेरपि सर्वं सन्मात्रमुक्तमेवेत्यर्थः। उक्तमेवा
र्थं संप्रतिपन्नेनोदाहरणांतरेण समर्थयते। यथोसादिना। किमिदं सारूप्यापेक्षायां तद्व श्रणाम्याहैकमिति अवतारि
ते लक्षणावाक्ये प्रथमं विशेषणयोरर्थमाह। स्वकार्ये निःसजातीयस्वगतभेदहीनमित्यर्थः। विशेषणांतरमादाय
व्याकरोत् अद्वितीयमितीति विजातीयभेदशून्यमित्यर्थः॥ यदुक्तं सत्सामानाधिकरण्यात्सदेव सर्वमिति तत्रारंभवा
दशंकते नन्विति किं कार्यस्य सत्सामानाधिकरण्यं वर्त्तमानदशायां परपक्षेपि संभवति उच्यते किं वा प्रागवस्था
यामपीति विकल्प्याद्यमंगीकरोति सत्यमिति द्वितीयं दूषयति प्रागुत्पत्तेस्त्विति लक्षणावाक्यं च परपक्षे दुर्योज
मित्याह न चेति वाक्यद्वयपर्यालोचनया परपक्षासंभवमुपसंहरति तस्मादिति दृष्टांतदार्ष्टान्तिकयोरैकरूप्यात्
दृष्टांतानां कार्यकारणाभेदनिष्ठत्वाच्च वैशेषिकपक्षासिद्धिरित्याह स्यादीति। वैशेषिकपक्षासंभवेपि नास्ति

पु·

क्षभा·टी
१२

कपक्षो भविष्यतीति शंकते तत्रेति। असत्त्वस्य तद्व्यावृत्तविषयत्वं वा तत्त्वभावमात्रमिति सतोऽन्यदसदिति द्विजेत
सद्भावादिनापि प्रतियोगिभूतेन सदा स्थितमित्याशंक्याह स दभावमात्रमिति तदेव वैधर्म्ये दृष्टांतेन स्फुटयति यथेति सदिति
यथाभूतमसदिति चेत्ततो विपरीतं रूपमाणां सद्भासद्वेति द्विविधं तत्त्वं भवतीति यथानेन व्यापिकावदं तिद्धेत्त्व सदसती
भावाभावाविति तैरप्यभ्युपगमाज्जनत्वाबौद्धैर्द्विविधं तत्त्वमिष्टं सदसत्त्वं ताभावोऽसदिति अभ्युपगमाद्प्रतीतप्रतियोगिका
भावस्यात्यंताभाववत्या शशविषाणानास्तीत्यादौ प्रसिद्धत्वादित्यर्थः॥ तमिममेवैनाशिकपक्षं शिष्यमुखेन दूषयति नन्विया
दिना॥ शिष्योक्तमंगीकरोति बाढमिति भावस्य योऽभावस्तन्मात्रमसदिति अभ्युपगच्छतां ते बांयसेन युक्तं कालसंबंधाद्यसत्त
ति युक्तमेवत्वयोक्तमित्यर्थः किंचतन्मते यस्य कस्यचिदसत्त्वमिष्टं सर्वस्य चेति विकल्प्याद्यमुपेत्य द्वितीयं दूषयत्य
सत्त्वेति किमभ्युपगन्ता यदा कदाचिदभ्युपगन्तव्यः किंवा प्रागवस्थायामपीति विकल्प्याद्यमंगीकृत्य द्वितीयं दू
षयत्राशंकते इदानीमिति साकिं तदानीमसत्त्वान्नाभ्युपगम्यते किंवा तदभ्युपगन्तुरभावात्राद्यद्भुत्याह न प्रागुत्प सम०
त्तेरिति न द्वितीयः प्रागुत्पत्तेर्जगदसदिति स्याभ्युपगन्तारं प्रत्यभ्युपगम्यते तथा प्रागवस्थायामभ्युपगन्ता १०२
सन्नित्यस्याप्यभ्युपगन्तुरिदानीमभ्युपगमसंभवान्न हि प्रागुत्पत्तेस्तस्य सत्त्वे मानाभावः विमतः कालो नभ्युपगन्ता

वाक्यार्थत्वात्संभवतीत्यनुमानादित्याह प्रागुत्पन्नेति। परपक्षं दूषयित्वा वाक्यतात्पर्यं दर्शयितुं चोदयति नन्वित्यन्व
यायोग्यस्य शब्दार्थत्वे सत्ययोग्यत्वस्य न त्वदर्थत्वे वाक्यप्रमत्वादिति शब्दस्यार्थसिद्धान्ततेऽत्र मीमांसकप्रक्रियया
शब्दार्थत्वे सत्येकमद्वितीयमिति पदयोरन्वितवाचकत्वायोगादर्थानुपपत्तिस्तदभावे च पदार्थसंसर्गाद्यात्मनो वा
क्यार्थस्यानुपपत्तिर्वाक्यार्थानुपपत्तौ च निर्विषयमिदं वाक्यमप्रमाणं स्यादित्यर्थः। सदभिनिवेशनिवृत्त्यर्थमित्येवा
कां न तद्व्यस्यमेव साक्षादभिधत्ते तन्न वाक्याप्रामाण्यमिति परिहरति नैष दोष इति। नन्वथापि कथमसदादिशब्दा
नामप्रतीतशक्तिकत्वे वाक्यार्थोपपत्तिरित्याशंक्याह सन्निहितपदमिति। एकमद्वितीयमिति श्रुत्यवच्छ्यवदिदमास्ते। ऽद्वितीयशब्दैः स
हत्वेन समानाधिकरणत्वेनेत्याह तत्रेति सदेवेत्यादिवाक्यस्योक्तविधयार्थत्वेऽपि वाक्यमसदेवेत्यादिवाक्यमथैव
दित्याशंक्याह तत्रेति। इवशब्दो यद्वदित्यस्मिन्नर्थे तद्वदिति यत्र कुप्रयोगादित्यर्थः। किमिति वाक्यस्य सदभिनि
वेशनिवृत्तिपरत्वं सदभावपरत्वमेव किं न स्यादित्याशंक्याह नेति। सदभावस्यात्यन्ताभावलक्षणस्य तद्य
त्ता छब्दशक्तिगोचरत्वासंभवादित्यर्थः॥ अन्यपरत्वासंभवे सदभिनिवेशनिवृत्तिपरत्वं वाक्यस्य सिद्धमित्यु
पसंहरस्यतद्गतिप्राक्काले पुरुषस्य सदभिनिवेशनिवृत्तिरत्र विवक्षिता चेत्तर्हि नञ्पदमेव प्रयोक्तव्यमिति

४२

छांभाटी त्मसदेवेदमग्र आसीदिति प्रयुक्तमित्याशंक्याह दृष्टोपि सेति । अथ वासदेवेत्यादिना स्वपक्षमुक्त्वा तद्दृढीकरणार्थं वेनास
१०३ देवेत्यादिनानुवादो यमिति तान्यौ तन्माह । दृष्टोपि सेवाहीति प्रथमे पक्षे न स्मादित्यादिवाक्यस्याप्योभावात् द्वितीयप॰
पक्षोऽत्रहीनस्तत्र कारणस्यासत्त्वमुक्तमिदानीं कार्यस्यापि तद्दर्शयति न स्मादिति । अजायतेति वक्तव्ये कथमुत्पाजा
यतेति प्रयुक्तमित्याशंक्याह अद्भावइति कुतस्तत्खल्वित्यादिवाक्यालोचनायामपि द्वितीयपक्षोऽथाह्यदृत्याभिप्रेत्या
हन्देतादिति । किमनमभावपुरस्सरं कार्यं वादं कुरवदिति प्रमाणाशंकतेयदपीति । अप्रसिद्धविशेषणत्वं मत्वा परिहरतीत
यथेति बीजोपमर्दनांकुरोत्पत्तेरिष्टत्वात्कथमप्रसिद्धविशेषणतेति शंकते । कथमिति । किमंकुरोत्पत्तौ बीजावयवावयवोपमर्दं
तेकिं वा बीजाकारसंस्थानमिति विकल्प्याद्यं प्रत्याह यतो नावादिति द्वितीयं दूषयति यत्पुनरिति । किं परमार्थेवस्तु किं वासं
वृत्तिसिद्धं नाद्योऽभ्युपगमविरोधादित्युक्तं । द्वितीयमुद्धापयत्यथ संवृत्त्येति संवृत्तिं विकल्प्य तत्तेकेपमिति । आद्ये भा
वस्याभावादुत्पत्तौ दृष्टान्ताभावः संवृत्तेरवस्तुत्वे न बीजत्वासाधकत्वादित्याह । यदीति द्वितीयमनूद्य दूषयत्यपथेति । तत्संप हाम॰
यासं व्रियते आच्छाद्यते सा संवृत्तिर्लौकिकी बुद्धिः सा चेद्भावरूपेष्टा न हि तया बीजावयवानामंकुराकारपरिणामसि १०३
द्धेर्दृष्टान्तासिद्धिरित्यर्थः ॥ लौकिकबुद्धिमनाश्रित्य परमतमेवाश्रित्य शंकते अवयवा इति प्रसत्यावयविन्युपमर्दो यो

ति३

गवस्य यवेषपित्तरयो॥ स्यात्तुल्यत्वान्नेदं ~~चो~~ चोद्यमित्युक्तं रमाहन्नतस्व यवेषित्तितत्त्वे स्फुटपत्ति। यथोतिनच्च स्कास्य सेप
रमावयवीनास्त्यवयवास्कसंत्ये वेतिचेन्नआहवीजावयवानामपीति नहिते षामंकुरजनकत्वमनुपमर्दः स्यादिति वैजेनाह
नद्देव यवानामपीतिन चांकुरजनकत्वं यवयवयपरंपराविश्रांतिमसिद्धयपघत्तेतस्याः कृत्स्नत्वेन तदुपमर्दे सत्कारणाबाधा
पातात् कृत्स्नत्वेपि कार्यत्वे कारणाविरुद्धत्वस्य सावयवत्वेनोक्तदोषतादवस्थ्यात् कार्यत्वेभावस्यैवदुपमर्दोसिद्धिमत्येव २
नेदुपमर्दे सत्कारणतावाधापत्तिरेवेतिभावः॥ असद्वादस्याप्रामाणिकत्वमुक्त्वा सद्वादस्य प्रामाणिकत्वमाह सदुद्धीति २
।परमतेदृष्टांतामावमुक्त्वा स्वमतेतत्सत्त्वं च समुत्थितोतीति नन्विति घटस्यापि भावादेवोत्पत्तेरिष्टत्वाद्दृष्टांतासंप्रतिपत्तिरिति
शंकामाह यदीति किंच यद्यस्योपादानं तद्धि तत्रैव प्रत्ययो नत्वन्यत्रानुवर्तेत यथा तथाभावस्येतघटादेरुपादानं तत्सद्रूपमेवी
तत्रानुवर्तेत स्यात्तां नचानुवर्तते तस्मात् सतः सदुत्पत्तिरयुक्तेत्याहाभावेति।भावस्यासत्तामपिंरस्य घटादिकारणत्वम
न्वयव्यतिरेकाभ्यामुक्तं तत्रान्वयव्यतिरेकयोरन्यथासिद्धिमुद्भावयति यदपीति तस्मिन्नपि पक्षेन मम्यक्सौतिरित्युक्तमो ६३
हेतसापीति यदुक्तं सद्रूपापानुवृत्तेः सद्रूपा बुद्धिं प्रति कारणत्वमिति तदसिद्धमिति शंकते मद्रूपबुद्ध्योरिति सत्वसिद्धो हिप
वैभाविवं कारणासंकार्यत्वं चोत्तरभावित्वं पुनःबुद्धीनां चासत्वादानंतर्यमात्रेण व्यवह्रियते निमित्तनैमित्तिकत्वमित्यर्थः

म१

सां.भा.टी. असतो नापि बुद्ध्यादीनामानंतर्येणानिमित्तनैमित्तिकत्वमित्येतच्च शक्यं संभावयितुं दृष्टांताभावादित्युत्तरमाह न बुद्ध्यादीनामि
१४ ति कुतस्तस्य खल्विन्यादिव्याख्यां आख्यातमुपसंहरत्यत इति एवं असतः सदुत्पत्तौ दृष्टांताभाव उक्तः इदानीमन्यदुपसंह
तामिति शंकां वारयन्नसत इति स्वपक्षसिद्धिमुपसंहरतीति संबंधः सिद्धांतेपि दृष्टांतासिद्धिस्तस्येति शंकते नन्वि
ति यद्यपि मृदो घटोत्पत्तिर्दृष्टांततया पिनमृदो मृदंतरं घटांतरं तानुत्पद्यमानमुपलभ्यते न स्मात्र सतः सदंतरो
त्पत्तिरित्यर्थः। किं सदंतरस्य सतः सकाशादुत्पत्तिरेव बाध्यते किं वा कारणत्वं सतो निराक्रियते तत्राद्यमंगीकरोति सत्य
मिति द्वितीयं निराकरोति। किं तर्हीति तत्रापि दृष्टांताभावमाशंक्याह यथेति (किं वा कारणत्वं सतो निराक्रियते तत्राद्यमंगीकरोति)
सत्यमिति द्वितीयं निराकरोति। किं तर्हीति तत्रापि दृष्टांताभावमाशंक्याह यथेति कुतस्तत्सद्भावे कार्यत्वप्रसिद्धिनीत्याशं
क्योदाहरणांतरमाह यथा चेति। प्रभेदे रवनिषु तदुप इति संबंधः। सत एव सर्वे प्रकारेणानवस्थाने प्राक्कालिके कार्यस्यासद
वचनमयुक्तं तस्य सर्वदा सत्त्वाविशेषादिति शंकते यद्येवमिति प्रागभव्यस्था हि कारणांसन्मात्रत्वं च कार्यस्याव धार्यतेत राम
था च कारणात्मस्वेव सततत्त्वे नैतेनाकारणावस्थानमित्यंगीकारेपि कार्यस्य प्राक्कालिकं सत्त्वावधारणमविरुद्धमित्युत्त १४
रमाह नैन्वति। कार्यस्य कारणमात्रत्वं चेदवधृतं तर्हि कारणमेवासीन्न कार्यमिति तर्हि सदेवेदानीं जातमित्यसत्कार्यवादिम

नमायात्वमिति शंकते प्रागनमिति कारणस्यैव कार्यरूपेणावस्थानान्न सत्कार्यवादापत्तिरिति दृष्टांतेन परिहरति नेत्यादिना
विमतमृदादानाद्विघनेतरद्वैलक्षण्याबुद्धिविषयत्वाद्घटाश्वबुद्धिविलक्षणो महिषस्तेनास्मि घनेतरत्वाच्च कथं सतत्वेवं।
धीविषयानिर्वाच्यावस्थांगीकारेणासत्कार्यवादापत्तिसमाधिरिति चोदयति नन्विति विलक्षणाबुद्धिविषयत्वस्याभे
दमात्रसाधकत्वे सिद्धसाधनं तात्विकभेदसाधकत्वे दृष्टांतासिद्धिरित्यभिप्रेत्याह नेति किंच कार्यस्य व्यभिचारित्वेना
नृसर्पादिवन्मिथ्यात्वानुमानादनिर्वाच्यसंस्थानादेव कार्यबुध्यालंबनत्वं सतोंगीकर्त्तव्यमित्याह यदीतितरैवमप्यु
दयतिपघयीतिमृदंतंतरेणापि घटयोः स्वरूपाभावादिति तत्सद्भावार्थं व्यभिचारेणोक्तमित्यादिदृष्टांतं व्यभिचारफलमा
हनस्मादिति दृष्टांतगतमर्थं दार्ष्टांते समर्थयमेवमिति अथोवप्रथमानस्यकार्यस्य कथं सन्मात्रत्वमित्याशंक्याह व्यवचारं
भणोतिकार्यमिथ्यात्वं स्फुटीकर्त्तुं चोदयति नन्विति यथावस्तुसत्तेभ्यो रज्ज्वघवयवेभ्यः सर्पादिसंस्थानमानिकीयमि
षेनथाश्रुतिजनितजगत्कारणत्वबुध्यनुपपत्त्या कल्पितेभ्यः सतो मायोपाधिकस्यावयवेभ्यो विकारसंस्थानमुपपद्य
तेतस्माद्दर्यद्वैतग्रंथं चो ब्रह्मविवर्त्तः संभवतीति परिहरति नैषदोष इति ब्रह्मविवर्त्तो जगदित्यत्र श्रुतिमनुकूलयन्निवा
चारंभणमिति ग्रंथं च मिथ्यात्वे फलितमुपसंहरत्येकमेवेति श्रुतिद्वितीयत्वसमर्थनार्थमुत्तरवाक्यमुत्थाप्य व्याचष्टेत

त्वादिति सत्त्वबुद्ध्यां जगत्कारणं प्रधानमिति केचित्तस्यैतेन निरस्तमित्याह तच्छ्रुतेरिति ईक्षापूर्वकारित्वादित्यावरचेत
नस्याभ्युपगमात्तस्य श्रायत्वेकं स्वष्टत्वमिति पूर्वपक्षः परिग्रमिति वर्जवाद्या वाक्यविरोधाहरणाद्बहुस्यामित्यादि श्रुतिता
त्पर्यं वक्तुं निरस्तमेव चोद्यमुद्भावयति असदेवेति च हुस्यां प्रजायेयेत्यनेनेक्षितुरेव कार्य्याकारापत्ति वचनेनैव शुषि
कोऽस्मितमेतन्निरस्तमिति अतितात्पर्यं रचयन्नुत्तरमाहनेत्यादिना। न ह्येव प्रपंचयति पर्थेत्यादिना। प्रतिज्ञातमर्थम
नुरूपानुसारेणाहृष्टांताभ्यां स्पष्टयति यथा रज्जुरिति। अज्ञानान्वयव्यतिरेकाभ्यां रज्जुसर्पादिरज्ञानमयत्वं चैतद्द्वैता
मिति निरूपस्य सन्मात्राविवेके सत्येवोत्पत्तिर्विचारेण तद्विवेके चानुत्पत्तेर्द्वैतमप्यज्ञानमयमेव तस्मात्तत्त्वं सन्मात्रमधिष्ठानं वाग्म
नसातीतमित्यर्थः।। तस्य वाङ्मनसातीतत्वे प्रमाणमाह यत इति। अन्यस्त्वत्र हिरण्यादिवाक्यमादियराथेः। तैत्तिरीय
सि॰८ कश्रुतिविरोधमाशंकते तेनान्विति। तथापि कथं विरोधधीरित्याशंक्याह निविरुद्धमिति। अस्यां श्रुतौ सतः सकाशात्स्वप्रा
थम्येन तेजः सृज्यमानमुच्यते अस्यां तु तेजस्तस्मात्सतः सकाशादाकाशं प्राथम्येन सृष्टमित्युच्यते तथा च कथ
मिदं मिथो विरुद्धं सिद्धमितीत्यर्थः। तैत्तिरीयश्रुत्यनुसारेणाछांदोग्यश्रुतेर्व्याख्यानसंभवान्न विरोधो सौ नियमहिरजि राम॰
नैषदोषइति। स्वच्छिके मत्याविवक्षितत्वमंगीकृत्योक्तं तद्देवनास्त्यपतीयत्वं तु सतो विवक्षितमिति पक्षांतरमाश्रि १०५

त्माहाथ चेतितत्रगमकं दर्शयति सदादीनि सदादिकार्यं घटादि तद्धाति स्फुरणानास्ति सदाधेव तु सत्यमिति दृष्टांतोव्याख्यातः
रणाः सतस्तेजोवन्नादिकार्यं नरंतरिकेरणानास्ति सन्मात्रमेव सत्यमिति दार्ष्टांतिकेऽपि विवक्षितं प्रमाणीत्यर्थः। तत्तेजोसृज
नेत्यादिश्रुतेस्तात्पर्यांतरमाह। अथवेति नासांत्रिवृतं त्रिवृतमेकैकं करवाणीत्यादौ त्रिवृत्करणस्योक्तत्वात्तत्र याणामेव भूता
नामिह सृष्टिरुक्ता तेन चैवं पंचीकरणमविवक्षितमिति वाच्यं भूतत्रयसृष्टिश्रुतेरत्यंतरसिद्धाकाशादिसृष्टेरुपल
क्षणावत्रिवृत्करणश्रुतेरपि पंचीकरणोपलक्षणत्वात्तथाच श्रुत्यंतरसिद्धयोराकाशवाय्वोः तेजः प्रभृतिषु अंतर्भावमभिप्रे
त्य लघूपायेन सर्वस्य सन्मात्रत्वं मंतव्यमिति मन्वाना श्रुतिस्त्रिवृत्करणमेवाचक्षाणा तदनुरोधेन त्रयाणामेव सृष्टिमाहेत्यर्थः ते
जसो चेतनस्य कथमीक्षितृत्वमित्याशंक्य वाक्यार्थमाह तेजोरूपेति अपां तेजःकार्यत्वे लोकानुभवमनुकूलयति यस्मा
दिति। पृथिव्यामन्नशब्दप्रयोगे हेतुमाह पार्थिवं हीति। अपां कार्यमन्नमित्यत्रापि लोकप्रसिद्धिं दर्शयति। यस्मादिति
नाऽन्नमसृजं तेत्यत्रापोन्नसृष्टिरूपादिष्टांतेपिताभ्यस्तत्सृष्टिरूपादिश्यते तथा च यो न ह्रूज्यामित्याशंक्याथविशे
षं दर्शयन्नन्नमिति नितत्तेज ऐक्षतेत्यादेर्यथाश्रुतमर्थं गृहीत्वा चोदयति नन्विति प्राणिषु हिंसाप्रतिषेधवत्स्तुय
हविर्धानवच्चतेजः प्रभृतिषु तदभावात्तेषां क्षीणं प्रकार्यं दृष्टिवस्तेषु तत्र दृष्ट्यभावाच्च नैतेषामीक्षणं ताम्रामाणिकं तथा

८६३

चाप्रवृत्तं वाक्यं प्रमाणीतमित्यर्थः। तेषां गौणमीक्षितृत्वमुपेत्य परिहरति नैष दोष इति सतोपि गौणमीक्षणमुपचा
रप्रायेपाठादिति शंकते नन्विति संनिधेः शब्दस्य बलीयस्त्वमुपेत्य परिहरति न सदीक्षणमस्येति। तत्प्तं तेजःप्रभृ
तिष्वपि शब्दान्मत्वमीक्षणस्येति चेत्त्याह तेजःप्रभृतीनां त्विति। विमतमीक्षितृत्वं न भवत्यचेतनत्वात्कुम्भव
दित्यनुमानात्तेजोमुख्ये जातीक्षणासंभवात्तत्र श्रुतं तद्दौपचारिकमुचितमित्यर्थः। सांख्योनुमानावष्टंभेन
शंकते नन्विति अचेतनस्य कथमीक्षणमित्याशंक्याह तद्वदिति। अनुमातं कल्पयितुमिति यावत्। कथमचेतने चेतन
वदुपचारस्तत्राह दृष्टश्चेति। आत्मशब्दावष्टंभेन परिहरति नेत्यादिना। आत्मोपदेशोपि प्रधाने गौणो भविष्यतीति शंकते आ
त्मोपदेशोपीति। तामेव शंकां दृष्टान्तद्वारा विवृणोति यथेति। दूरं परिहरन्नस्मिन्नात्मोपदेशो गौणो न भवतीति तन्निष्ठ
स्य मोक्षोपदेशादित्युत्तरमाह नेत्यादिना। मोक्षोपदेशोप्युपचरितो भविष्यतीति शंकते सोपीति। शंकामेव विवृ
णोति प्रधानात्मेति। एकविज्ञानेन सर्वविज्ञानोपदेशमाश्रित्य परिहरति नयेनेति। उक्तमेव विवृणोति सत्येकस्मि रत्न० १०६
न्निति सतोन्यस्य ज्ञानस्याप्रामाणिकत्वाद्ब्रह्मसतो ज्ञानेन सर्वज्ञानोपदेशोपपत्तिमानित्याह। न चेति। संप्रति हि प्रधा
नज्ञानेन तद्विकारस्य तदभिन्नस्य ज्ञानं तस्य च पुरुषार्थत्वात् ज्ञाने पुरुषाणामपि ज्ञानमुपचर्यते तस्मादेकवि

ज्ञानेन सर्वविज्ञानोपदेशश्च शास्त्रे मोक्षोपदेशान्मुख्यत्वसिद्धिरित्याशंक्याह सर्वस्य चेति कथमुपनिषद्द्वारं मोक्षयेत्युच्यते पु
मर्थसाधनत्वानार्थत्वाक्षित्याशंक्याह पुरुषार्थेति तस्यानुमानवादिनः सांख्यस्य मते मुक्तिहेतोर्ज्ञानस्य जडाज्जडः पौरुषा
नुपपत्तिरित्याशंक्य नातश्चैतैव सिद्धत्वादुपनिषद्द्वारं मोक्षयेत्यर्थः ॥ श्रुतत्वेमुख्यार्थत्वेवाधकाभावाज्जत्यपरित्यागायोगाद्वि
क्षत्याधिकरणन्यायेन प्रधानवादासिद्धिरितिपरमतनिरसनमुपसंहरति तस्मादिति प्रधानवादासंभवे परिशेषाया
न स्वमतं निगमयति श्रुतत्वादिति । माहाभूतानामचेतनानां ब्रह्मकार्यत्वोक्तेः संप्रति जीवाविष्टानां भौतिकानामपि परं
परया ब्रह्मकार्यत्वे चेति वक्तुं तान्यनुवदति तेषामिति परिबोध्यायेयेषां गत्यागती दर्शिते तत्र जीवं च स्थानमुक्तं तानि
तच्छब्देन परामृश्यन्ते । तेषां प्रसिद्धत्वद्योतनार्थे त्वल्विति स्फुटं भूतानां त्रीण्येव बीजानि भवन्ति त्युक्तत्वे संबंधः ॥ भूत
शब्दस्य तेजःप्रभृतिषु रूढत्वात्तेषामिह ग्रहणं किं न स्यादित्याशंक्याह तेषामिति । भूतानां प्रत्यक्षत्वमेषामिति
निर्दिष्टत्वे संभवति च पक्ष्यादीनां प्रत्यक्षत्वे तितान्येवात्र भूतानि विवक्षितानि न तु तेजःप्रभृतीनि तेषां प्रत्यक्षत्वायो
गात्स्पर्थः ॥ तेजःप्रभृतीनां प्रत्यक्षत्वायोगादेषामिति निर्देशानुपपत्तिं समर्थयते तेषामिति तेषां प्रत्यक्षत यानि
देशासंभवे हेतुं तत्माह । देवताप्राब्देति देवतानां परोक्षत्वप्रसिद्धेरेतेषु च देवतापदयोगात्तेषां प्रत्यक्षत्वायोगपत्ति

रित्यर्थः॥ तस्मान्महाभूतानामन्त्रमसम्पृक्तेनोपादानाद्योगादित्यर्थः। अण्डजं पक्ष्यादीत्येतत्प्रत्यक्षेणोपपादयति। पक्षिस
र्पादिभ्योहीति। अन्यदपीत्यत्रोद्भिज्जमुच्यते अण्डजातमित्युत्पन्नं समारभ्याण्डमेव बीजमण्डजमिति प्राकृतेनान्वितिः। योर
षेयोत्युत्पत्तिः अन्यान्याध्येति परिहरति सत्यमित्यादिना। न केवलं प्रकृते एषां व्यवस्था किं तर्हि प्रत्यक्षेऽप्येत्याह दृश्यन्ते चेति
सत्येवाण्डजादौ तज्जातीयमण्डजादिसंतत्या जायते तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यामण्डजाद्येवाण्डजजातिकार
णं। यद्यप्यण्डजाद्यभावेनोद्भिज्जायते तथाप्यण्डजादिभावेऽप्यण्डजाद्यभावेऽपि तद्भवतीति नान्वयव्यतिरेकावण्डजादीनामण्ड
जान्येव बीजानि नाण्डजादीनीत्यर्थः॥ धानाद्युद्भिज्जबीजविषयः। ननु स्वेदजं संशोकजमिति बीजद्वयमवशिष्यते तत्
त्किमिति न व्युत्पाद्यते तत्राह स्वेदजेति स्वेदजमुद्भिज्जायमानं यश मशकादि तदुद्भिज्जेनैव भवति संशोकजं दोऽप्या
जायमानं यूकादि तदण्डजेन भवतीत्यत्र स्वेदजं यूकादि तदण्डजेनैव भवति संशोकाद्देहस्याद्भूमिमुद्भिद्य जातं मशका
दितत्स्यादुद्भिज्जेनैव भो[illegible]स्तथा च नतयो[illegible]थगुपन्यासेनायेक्षेत्यर्थः॥ स्वेदजादेरण्डजादावन्तर्भावस्य प्रापकमा
हैवमिति जीवाविष्टानां भूतानां सत्कार्यत्वप्रकारोपप्रामात्तयास्त्वमिदानीं जीवानां विशिष्टरूपेणाब्रह्मकार्यत्वेऽपि न
स्वरूपेणानत्कार्यत्वं ब्रह्मैवोपाधिप्रविष्टं जीवव्यवहारास्पदमित्यंगीकारात्तथाच ब्रह्मणोऽविकारात्तेजोवद्वित्तानं

सेत्स्यति जीवानां च भोग्यायतनानि भौतिकानि कार्याणि तेषां नामरूपनिर्माणं वक्तव्यमित्यभिप्रेत्योत्तरग्रंथमादाय व्याक
रोति सेयमित्यादित्यादिना। यथा बहुं स्यामिति पूर्वमीक्षितवती तथा किमिति पुनरैक्षत प्रयोजनाभावादित्याशंक्या
हतद्वेति। इदानीं महाभूतसृष्टेरनंतरमिति यावद्ब्रह्मणो मायोपाधिकस्य कारणात्मना मायोपाधिवशात्पूर्वसृष्टस्यानुभूत
लेतत्संस्कारस्य बुद्धिस्थत्वं स्मरणं चेत्यादिनाविरुद्धमिति द्रष्टव्यं। आत्मनेति विशेषणस्य तात्पर्यमाह प्राणेति निर्वि
कल्पकचिन्मात्ररूपा देवता मायावशान्महाभूतानि सृष्ट्वा तेषु यदा प्रविष्टा तदा तदारब्धेषु सूत्रविराट्प्रभृतिषु समष्टिव्य
ष्ट्यात्मसु देहेषु प्रविश्य तत्तद्देहाभिमानवती देवदत्तादिनाम्ना रूपेण च शौक्ल्यादिना संयोज्य पिंडं व्याकरोतीत्याहानुप्रवि
श्येति। देवतायाः सर्वज्ञत्वादसंसारित्वात्स्वातंत्र्याच्च संकल्पप्रवेशावयुक्तावितिशंकते नन्विति। किं साक्षादनुप्रवे
शादि विरुध्यते किं वा जीवद्वारापीति विकल्प्याद्यमंगीकरोति सत्यमिति। साक्षादनुप्रवेशादि नास्त्येव तर्हि कथं तदित्या
कांक्षापूर्वकं द्वितीयं दूषयति कथमिति। देवताया जीवद्वारेणानुप्रवेशाद्यविरुद्धमिति शेषः। अविरोधमेव साधयितुं
जीवस्वरूपमाह जीवो हीति। आभिमुख्येनाहमित्यापरोक्ष्येण तदाभासन्तत्वयाभासः स्वतोपरोक्षश्चित्प्रतिबिंबस्तन्मात्रं जी
वो नामेत्यर्थः। तस्य स्वरूपे ज्ञानादित्वेपि विशेषाद्रूपे साक्षित्वं दर्शयति। बुद्ध्यादीति। बुध्यादिभिर्भूतमात्रादिभि

णा

४६

क्षिदात्मनः संसर्गः स्वेनाजनितस्वतंत्र इति यावत् स्वसनुचिदात्मा कूटस्थे संगो द्वितीयस्थे व्यत्ते सकथं
बुध्यादिविलिर्क्तनमात्रादि इति

कां·भा·टी
१·८ अप्रसंसज्यतेतत्राहाचिंत्येति। सत्वादिविकारैरशक्यचिंतनीयाऽनादिरनिर्वाच्यासम्यग्ज्ञानमंतरेणनाशयितुमशक्यारंडायमाना
यामायाशक्तिस्तस्याविषयत्वेनाश्रयत्वेनचपरादेवतावतिष्ठतेतस्याश्चिस्वनिष्ठमायाशक्तिवशाद्बुध्यादिभिरात्मनःसं
बंधःसिध्यतीत्यर्थः॥बुध्यादिसंबंधफलमाह। चैतन्येति॥तदाभासोजीवशब्दवाच्यःसिध्यतीतिशेषः॥बुध्यादिभिरा
त्मनःसंबंधेमायाशक्तिरुपादानमित्युक्तंतत्रैवनिमित्तकारणमाह देवतेति। आवरणविक्षेपशक्तिसंपन्नाहिमाया
शक्तिस्ततोविद्योदयाद्देशकालाद्यनवच्छिन्नदेवतास्वरूपोहमितिविशेषाग्रहणमावरणनिमित्तं तत्त्वाबुध्याद्यध्या
सःसिध्यतीत्यर्थः॥बुध्याद्यध्यासस्यकार्यांतरं दर्शयति सुखीतियदेवतर्हि देवतासंसारिणीस्यादितिचेत्सत्यंअज्ञा
नद्वाराबुध्यादिसंबंधमनुभवजीवस्वभावप्राप्यैवससरतीत्याह छायामात्रेणेतियस्यादेवतायाःस्वतःसंसारा
भावंदृष्टांतेनस्पष्टयतियथेत्यादिनातस्याःस्वतोदुःखाद्यसंबंधेऽप्रतिप्रमाणयतिसर्वेइति।उपाधिद्वारातस्याः
संसारित्वेचश्रुतिरस्तीत्याह॥ध्यायतीतिप्रतिबिंबेछायाशब्दप्रयोगान्निध्यात्वमिष्टमितिमन्वानःशंकते अ तांम॰
न्वितितन्नस्याद्वमिष्टमेवेत्याशंक्याहतथेति। जीवस्यास्यात्वेस्वीकृतेसतितस्येहलोकपरलोकैकतद्धेतुधर्मा १·८
सत्त्वहेतुरश्चेतिसर्वमप्याख्यायिपर्थः॥द्विशाष्टरूपेणामिथ्यात्वेपिस्वरूपेणासत्यत्वाज्जीवस्यब्रह्मास्मीतित्वा

नान्मुक्तिः संभवतीति समाधत्ते नैष दोष इति। परन्तु परलोकेहलोकादिमयास्यादित्यत आह। सर्वं चेति। कथं तर्हि तस्य मिथ्या
त्वोक्तिरित्याशंक्याह स्वतइति। यथा प्रपंचो ब्रह्मात्मना सत्योपि स्वरूपेण मिथ्या तथा जीवशब्दवाच्योपि ब्रह्मात्म
ना सत्यः स्वरूपेण मिथ्येति स्वीकर्तव्यमित्याह। तथेति। अथ भोक्ता स्वरूपेणापि सत्योस्तु भोग्यप्रपंचस्यैव मिथ्यात्वमि
ष्यतामित्याशंक्याह यस्मादनुरूपो हीति। लौकिकन्यायानुसारेण भोग्यप्रपंचस्य मिथ्यात्वे भोक्तुरपि विभक्तस्वरूपे
यातत्वासिद्धेरतो जीवशब्दवाच्यस्य मिथ्यात्वेन तद्वैलक्षण्यस्य सन्मात्रस्य सत्त्वमिति व्यवस्थेत्यर्थः। प्रपञ्चता किंकेह्युच्यते
प्रपंचस्य मिथ्यात्वे सौगतमतानुमतिः सत्यत्वे चाद्वैतव्याहतिरिति तदपुक्तन्यायेन निरस्तमित्याह। अतइति। अद्वै
तवादे दोषाभावं वैधर्म्यदृष्टान्तेन स्पष्टयति यथेति। व्याकरवाणीत्येतदंतं वाक्यं व्याख्यायतदन्तर्घनासामित्यादि
व्याचष्टे सैवमित्यादिना। व्याकरवाणीत्येतेन निसंबंधः। कथं पुनरिदं त्रिवृत्करणमित्याशंक्य प्रथममेकैकं द्वेधा द्वि
धा विभज्य पुनरेकैकं भागं द्विधा द्विधा कृत्वा तदितरभागयोर्निक्षिप्य त्रिवृत्करणं विवक्षितमित्याह। एकैकस्यादिति गुण
प्रधानभावानंगीकारे समानपरिमाणास्तु त्रयनिर्मितरज्जुवत्त्रिवृत्करणमेकमेव स्यादित्याह। नन्वथेति। एवकारार्थं द
र्शयति नत्विति गुणप्रधानभावेन त्रिवृत्करणमुपसंहरन्नुमिति शब्दः। इतःस्फुटगुणप्रधानभावेन त्रिवृत्करणमेव व्याप्ति

काप्रा॰टी॰ १०५

त्याह एवं हीति प्र॰ यद्ग्राम प्रत्यपला मेनाधिकं स्यादित्याशंक्याह प्रथमेति सेपमित्यादिव्याचष्टे एवमित्यादिना संक्षेपेण
त्रिवर्गस्य रागाद्यनिष्टापोहाहरणातः स्फुटीकर्त्तु मारभमाणो देहे त्रिवर्गस्य रागाद्यपोहे स्फुटीकर्त्तव्यत्वादेहानीति जैसु प्रथमं तदु
दाहर्त्तु मुपक्रमते नेति ष्ठल्तावदिति कथमुदाहरणानीत्यवधारणामित्याशंक्यानंतरवाक्यमवतारयति यत्नादिति उदाहरणा
शब्दं व्युत्पादयति उदाहरणानामेति तत्रैव शक्तिमवनार्यं व्याचष्टे तरेतादित्यादिना अत्रिवर्गस्य तमो रूपमिति विद्धीति सं
बंधः तत्राग्ने रूपत्रये पूर्वोक्तनीत्या प्र॰ यद्युक्ते मनीति पावते ॥ इदानीं विवेकदशायामित्यर्थः ॥ अस्यार्थं मुक्तावा
क्तान्यथार्थमाह प्राणिति रूपत्रयविवेकात्प्रागवस्थायाम [illegible] शब्दबुद्धी तद्विवेकादूर्ध्वं तन्निवृत्तिरित्येनमर्थं द्रष्टा
तेन समर्थयते । यथेत्यादिना । अग्निविषये शुभं हि त्यधिककल्पनाया नास्ति निबंधनमिति शंकते । नन्विति । रोहिता
दिरूपत्रयविवेके सत्यग्नेरग्नित्वमपगच्छतीत्यत्र दृष्टांतमाह पथेति । शब्दबुद्धिप्रसंगेपि नशक्तत्यागोस्तीति परिहर
तिनैवमिति तत्र प्रमाणत्वेनानंतरवाक्यमादाय व्याचष्टे । पतदिति । अग्नेर्नाममात्रत्वमनः शब्दार्थः । प्रक्रमपर्यालो
चनायामुदाहरणोप्यनलमक्षीति शंकते नन्विति यद्यपि कूपादेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृ
र्हे ष्णं तदन्नस्येत्यत्र श्रीहियवादेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तेस्यो पत्कृष्णं तदन्नस्येत्युदाहरणं सभवान्नन्वन्न

राम॰ १०५

नेति पीडयतीति नैष दोष इति। तर्हि तेजो विषयमप्युदाहरणमस्तु नीलं किंमित्युदाहृतमित्याशंक्याह। तेजस इति। यद्यपि क्षित्य
युनोदाहरणमुच्यते नोपलक्षणमेव सिद्धेदतस्त्रयाणां रूपवत्त्वेन यथोक्तरूपविभागस्य तेषु स्फुटत्वसंभवात्तेजसोऽ
पानप्रदर्शनमत्राधिविषयोदाहरणोपलक्षणार्थेन ननोपेक्षितमित्यर्थः। अबन्नयोरपि त्रिवृत्करणमुपलक्षितं
चेन्नहि तत्र रसगंधयोरसाधारण्यात्तयोस्त्रिवृत्करणमुदाहृतं स्यामित्याशंक्याह। गंधरसयोरिति। यथा पदं तन्त्रयो
भी स्वरं लोहितं रूपं तत्तेजसमस्तद्रूपं प्रयच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति शक्यते रूपं विवेक्तुं न तथा मधुकोरसोगंधो वा तेज
सोयामन्नस्यास्तीति वक्तुं शक्यमित्यनुदाहरणं तयोरित्यर्थः॥ ननु त्रिवृत्करणयोः त्रिधाथि रूपवत्त्वं यत्सोऽसंभावि
तोनत्कथं तयोस्त्रयाणामसंभवो जिज्ञासत्राह नहीति। संभावितावयितो त्रिषु विवक्तुमशक्यावितिअनुदाहरणौ॥
यावित्यर्थः। नहि सर्वेषु भूतेषु संभाविततयोः स्पर्शशब्दयोरुदाहरणं किं न स्यादित्याशंक्याह स्पर्शशब्दयोरिति
यथा लोहितादिरूपत्रयं त्रयाणां विभागेन दर्शयितुं शक्यं न तथा शब्दत्रयं स्पर्शत्रयं च त्रयाणां विभागेन दर्शे
यितुं शक्यं नो खल्वेकत्रोष्णशीतानुष्णाशीतस्पर्शत्रयं दृश्यते नापि तद्वन्मधुरमध्यमशब्दत्रयमेकत्रोपलभ्य
मित्यर्थः। सर्वस्य त्रिवृत्कृतत्वे फलितमाह यदीति यथाग्न्यादि त्रिवृत्कृतं तथा सर्वमेव जगदपि त्रिवृत्कृतमि

त्वं गीकृतं तदाग्नेरग्नित्ववज्जगतोऽपि जगत्त्वमपगतं त्रीणि रूपाणीत्येव सत्यमिति योजना। तथापि कथं सन्मात्रपरिशे
षः स्यादित्याशंक्याह। तथेति रूपत्रयव्यतिरेकेण जगतो भाववत्त्वस्यापि रूपस्य पृथिवीशब्दितस्याप्शुक्लरूप
मात्रजलकार्यत्वात्तद्व्यतिरेकेणासत्त्वं पृथ्वीवदपामपि शुक्लरूपमात्राणां लोहितरूपमात्रतेजोविकारत्वात्त
द्व्यतिरेकेणाभाववत्तस्यापि सत्कार्यत्वात्ततो भेदेनासत्त्वं सन्मात्रमेव परिशिष्टमित्येतत्त्रिवृत्करणप्रकरणे वि
वक्षितमित्यर्थः। त्रिवृत्करणपक्षे नैकविज्ञानेन सर्वविज्ञानं सिध्यति परिशिष्टविज्ञेयसद्भावादिति शंकते
नन्विति। इतिपदं कथमित्यादिनासंबध्यते। गंधादयः शब्दांता गुणा गुणिभ्यो घनंन भेताः संतीति न सद्विज्ञानेन
तद्विज्ञानोपपत्तिरित्याह। गंधेति। तद्विज्ञानं सद्विज्ञानेनवाप्यादिविज्ञानं तत्र प्रकारांतरं तत्कार्यत्वादतिरि
क्तमिति यावत्। आकाशादेस्त्रिष्वन्तर्भावासंभवात्त्व परिशिष्टविज्ञेयमस्तीति परिहरति नैष दोष इति।
कथं तेजोवन्नेषु सर्वस्याकाशादेर्दर्शनमित्याह। कथमिति। तत्र शब्दस्पर्शयोराकाशवाय्वोश्च भूतत्रयेऽप्र राम०
त्यक्षानुमानाभ्यामुपलब्धिं दर्शयति तेजसीति। तेजोग्रहणमबन्नयोरुपलक्षणं तत्रापि स्पर्शाद्युपलब्धे ११०
रविशेषाद्यनुगंधादिज्ञेयांतरमिति तत्राह तथेति भूतत्रये स्पर्शाद्यंतर्भाववदिति यावत्। त्रिष्वेवांतर्भावप

लितमाह। रूपवतामिति। मूर्त्तत्रये रूपवत्त्वात्काशादेरंतर्भावं व्यतिरेकद्वारा समर्थयते नेहीति। अमूर्त्तमौर्वोक्तिप्रकाशं पीहे
मुपक्षांतरमाह। अथवेति प्रदर्शनार्थं पंचीकरणस्येति शेषः॥ कथं पंचीकरणोस्तन्मात्रेषु शेषः सिध्यतीत्याशंक्याह। ए
केतिपक्षापंचाथिभूतानि प्रत्येकं द्वैधा विभज्य पुनरेकैकं भागं चतुर्द्धा विभज्य भागानितरेषु पूर्वेषु भागेष्वेकैकशो
निक्षिप्यते तेन तत्पंचीकरणं अनुपलक्षितं लभ्यते त्रयाणां पंचानां भागानां पृथक्करणे यंचैव तन्मात्राण्यवशिष्य
न्ते तान्यपि पूर्वोक्तादिभ्यो बाह्यकार्यत्वाज्जगत्कारणाव्यभिरेकेणानसिध्यंतीति त्रिवृत्करणवत्पंचीकरणेपिन्याय
साम्यं सिद्धेस्यसाध्यकारत्वाभ्युपगमेति रेकेणाभावात्तेन विज्ञातेन तत्र यदविज्ञातमेवस्यात्तस्तन्मात्रेष्वपरमार्थसत्वेपरिशि
ष्टं भवतीत्यर्थः। उक्तन्यायेनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरुद्धेत्युपसंहरतितदेकांमिति त्रिवृत्करणापरोप्ये
कविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरुद्धत्युपपाद्य त्रिवृत्करणमुदाहरणांतरेणादर्शयितुमारभते एतमादि त्रिवृत्करणा
मिति यावत्तानेवपुनरिति त्रिवृत्करणविज्ञानवंतो निर्दिश्यंते॥ वेदनप्रकारमेवाकांक्षापूर्वकं प्रकटयति कथमित्या
दिना। अग्न्यादिभ्यः संकाशादिति शेषः॥ यदन्येकरूपं त्वकपोतादिरूपेणासंदिह्यमानमेतत्तत्प्रश्यतेनस्मिन्नपोता
दिसत्त्वरूपेयत्किंचिद्वोहितमिवरूपं गृह्यमाणं पूर्वेषामासीत्तत्तेजसो रूपमिति तेविदित वंत इति योजना॥ अन्यंतदु

७१

श्रीभा॰टी॰ लीस्यं नामरूपाभ्यां दुर्ज्ञेनं द्वीपांतरादागतं पक्ष्यादीत्यर्थः॥ अग्रग्रह्यमाणामिति छेदः॥ यथा खल्वित्यादिवाक्यं वक्ता
११९ नुवादपूर्वकं भवतारयति एवं तावदिति॥ यथा खल्वेवैके का देवतापुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तथेदानीं तदाध्यात्मि
कं त्रिवृत्करणमेवमेवेति जानीहीति संबंधः॥ आध्यात्मिकं त्रिवृत्करणमिति शेषः॥ कथं त्रिधा विभज्यमानत्वं कथं
वा तस्य विनियोग इति प्रश्नपूर्वकं विवृणोति। कथमित्यादिना। रसादीत्यादिशब्देन रुधिरादि गृह्यते तस्य कर्मफल
स्य नाडीचरो भोक्तेति हि तात्पर्यानावक्ताम्विति यावत्। कथमन्नोपयोगात्प्रागेव मनसः सिद्धत्वात्कथमन्नो भवती
त्युक्ते तत्राह मनोरूपेणेति॥ मनसोऽन्नोपचितत्ववचनाद्वैशेषिकपरिभाषापि दूषितावेदितेत्याह ततश्चेति॥ मन
सो द्रव्यत्वविशेषणान्नित्यत्वसिद्धिरित्याशंक्याह पदर्थीति। केनाभिप्रायेणानर्हि विशेषामित्याशंक्याह किं
नेहीति॥ तर्हि चक्षुरादिभ्यो वैलक्षण्यात अनित्यत्वे पक्षस्यानित्यत्वमित्याशंक्याह यद्वेति। यद्वा चक्षुरादिवत्सन्न
पि मनसः संसर्गोपलंभाजरयेशस्यानस्य नित्यत्वमेष्टव्यमित्याशंक्याह यद्वेति॥ आत्मवन्मनसो नित्यत्वं किं न स्या राम॰
दित्याशंक्याह सादिति। भुक्तस्यान्नस्य त्रैविध्यमुक्त्वा पीतानामपामपि त्रैविध्यमाह तथेति। कथं तेजसोऽप्यादि ११९
त्यादेराशनमित्याशंक्या विदितानदृष्टि॥ तैलेति॥ मज्जा शब्दार्थमाह स्थीति॥ योऽणिष्ठः सा वागित्युक्तं व्यक्तीकरो

तितैलवचनादीति॥ भुक्तस्यान्नस्य पीतानामपामशितस्य तैलादेश्च ये अस्थिराष्ठाधातवस्ते मनोवाक्प्राणा इत्येवंप
न ·सिद्धमतस्तेषामन्नादिमयत्वं युक्तमित्याहयत इति॥ तेषामन्नादिमयत्वं व्यतिरेकसिद्धिमाश्रित्याक्षिपति नन्वि
ति॥ आखुप्रमुखानां स्फुटो दृष्टानां धानुयत्वेऽपि यत्ने मांसभक्ष्यं तत्रैवोदकाद्यं तन्मात्रसंभवात्प्राणादेरन्नमयत्वा
धुपपत्तिमित्युत्तरमाह नैष दोष इति॥ सर्वस्यान्नादेस्त्रिवृत्कृतत्वस्योक्तत्वान्न तस्य सर्वस्यैव भक्ष्यस्य भक्ष्यत्वपा
त्मत्वसंभवादेकैकं भक्ष्यतोऽपि सर्वभक्षतोपपत्तेर्मनआदेरन्नादिमयत्वमविरुद्धमित्यर्थः। इत्यमेवव्यक्तीक
रोति॥ नहीत्यादिना। उक्तरीत्या मनआदेरन्नादिमयत्वप्रसाधनद्वाराप्रत्ननात्रासन्मात्रपारिशेषप्रत्याप्तितेसजि
ष्वेतकेतुश्चोदयतीत्याह इत्येवमिति। सर्वेषां सान्निधानाविशेषेनस्य मनसोऽन्नांशेनैवोपचिनोतीति नियामा
मिति निश्चयासिद्धेरित्याह नाधायीति। पार्थिवो ह्यंशः पार्थिवमेवोपचिनोतीति विशेषमाशंक्याह यस्मादिति। १२
एकस्मिन्नुदरे प्रविष्टानामन्नादीनां मिश्रीभूतत्वान्मनसश्च सर्वभूतगुणव्यंजकत्वेन सर्वभूतारब्धत्वात्पा
र्थिवत्वासिद्धेर्नैतो विशेषः संभवतीत्यर्थः। यस्मादेवमभिप्रायः श्वेतकेतोरत इतियोजना॥ मनआदेरन्ना

द्भिमयत्वमुपपाद्य पितृमुत्तरग्रंथमवतारयति तमेव मिति। यदुक्तं मन आदेरन्नादिमयत्वं कथमिति पृष्टे सति
तदिदं यथोपपद्यते तथाऽन्नादिमयत्वं तस्य स्पष्टं तमुच्यमानं शृण्विति योजना॥ मिश्रीभावेपि सूक्ष्म
भागस्य पृथग्भावे कार्यकारणत्वे दृष्टांतमाह दध्न इति॥ दृष्टांतमनूद्य दार्ष्टांतिकमाह एवमेवेति॥ तेजोमय्या
नेन मथ्यमानस्य दध्नो यथाणिमा तथा यथोक्तस्यान्नस्य योणिमेति योजना॥ कथं तन्मनो भवतीत्यु
च्यते आगमयितुमनसः सिद्धत्वादित्याशंक्याह मनोवयवैरिति मन आदेरन्नादिमयत्वमुपसंहरत्यन्नमयं
हीति। अतो भवद्वमि याथार्थमिति यावत्। एतत्सर्वमिति प्राणस्याम्मयत्वं वाचस्तेजोमयत्वं चोच्यते। इद
पत्र देशे प्राणादिसन्निधाना विशेषे कथं मनस एवान्नरसेनोपचयदृष्टेस्तत्रापि समाहितमिति मत्वा
हमनस्त्विति मनसो विशेषतोऽन्नमयत्वमुपपादयितुमुत्तरग्रंथमुत्थापयति तथेति। अन्वयव्यतिरेका
भ्यां मनसोऽन्नरसोपचितत्वं दर्शयितुमन्नरसजनितां शक्तिं कलात्वेन कल्पयत्यन्नस्येत्यादिना षोडशाहेना
वच्छेदेन षोडशधाकृतस्यान्नं दृष्टवृद्ध्यं। तथापि पुरुषस्य कथं षोडशकलत्वमत आह तयेति। तामेव प्रकृताम

न्नरसकृतां शक्तिं विशिनष्टि पञ्चद्यामितितयासंयुक्तः पुरुषः षोडशकल इतिपूर्वेणास्य संबंधः।अन्नरसजनितैर्मानसशा
क्तिप्रयुक्तैः सैघातस्य सामर्थ्यमित्यत्र वाक्यं प्रमाणयति वृश्च्यतिचेति।आयोल्लामोस्याप्तो।यायीयावच्छं प्राप्याप्तामवति
तावदेवास्य दृष्टेत्यादिव्यवहारः संभवतीत्यर्थः।उक्तेऽर्थे लोकानुभवमनुकूलयति सर्वस्येतितदेवस्पष्टयति मानसेने
तिकिंचके चिन्मानसेनैवबलेन ध्यानाहारादहर्षप्रतेतत्त्वध्यानमन्त्रं पर्यायोपरिनिष्पन्नमन्त्रस्यैवदेहादिरूपेणापरि
णतत्वादित्याह ध्यानेति। एवं यानानिकंतत्त्वासोऽशकलशब्दार्थमाह। अतइतियतोऽत्रकृतं मानसंवीर्यमतस्तदे
वषोडशधाविभज्यकलायस्येति योजना। एतत्स्वदेनान्नकृतं मानसंवीर्यं परामृश्यते। विच्छेस्यते विच्छेदै मापत्स्य
तेयस्मात्तस्मादपः पिबेतिपूर्वेणास्य संबंधः॥ अपांपानपरित्यागे प्राणविच्छेदकारणमाह यस्मादितिप्राणाख्या
म्मयत्वेपिकिमित्यपांपरित्यागेतस्योच्छेदस्तत्राह।नहीति। कृशाघप्रतिभानंतत्रेत्युच्यते ईषदपिनदहेकुतो
बहुदहेदिति योजना। प्रकृतिर्ज्येतिकेः अन्नोपयोगाभावे मनसः सामर्थ्याभावः। अनुवृत्तिर्न्वयोऽन्नोपयोगे
मनसः सामर्थ्यमितिभेदः। मनसोऽन्नमयत्वमुपपाद्यपितत्पुष्पक्रान्तमापोमयः प्राणाद्याद्विकथमिहोच्य
तेतत्राह। यथेतादितिविद्यासमाप्तिमंतरेणाकथं दुर्विज्ञानमित्याशंक्याह। द्विरभ्यास इति। त्रिवृत्करणानियो

यद्विषयमवांतरप्रकरणंपरिसमाप्यमहाप्रकरणंसद्विषयमेवा॥नुवर्त्तयन्मनसोल्पयेसुषुप्तौजीवस्यसत्संप
त्तिंवक्तुंमनउपाधिकस्यमुक्तमनुवदतियत्रेति।उपाधेःस्वरूपमुक्त्वासंचारयतितन्मनइतिउपाध्युपहि
तेकार्यकरणत्वंदर्शयतियत्रायमिति।मनसोभावेजाग्रत्स्वप्नव्यवहारासिद्धिरित्युक्त्वातदभावेसुषुप्तिमवतारय
ति।तदुपरमेचेति।आत्मनिमनोवशादेवदर्शनादिव्यवहारेणस्वास्थ्येनेत्यत्रबृहदारण्यकश्रुतिंप्रमाणय
ति।तदुक्तमिति।द्वितीयेवाक्येसधीरित्येतदुपपद्यते।तृतीयेतुविचारमयोमनोमयइति।चपदद्वयमुपजीव्याह
नन्वेवंमरणिकावस्थासमनंतरवाक्यमात्मन्येतस्येति।तत्रसुत्रायेत्यत्रतस्यांदेवतायांतदवस्थानमितितदर्था
र्थः।तत्रेति।द्वितीयपक्षोक्तिः।अर्थादिति।स्वप्नस्यापिकार्यस्यसतत्वंकारणात्तत्रसुषुप्तमेवसुषुप्तावस्थितमो
क्षानंबीजंस्वप्नप्रबोधयोरित्युभयापादानमनात्।द्वितीयव्याख्यानेसुषुप्तमेवार्थवशात्प्रतीत्यर्थः।इतश्चस्व
प्नांतशब्देनसाक्षात्सुषुप्तमेवोक्तमित्याहस्वमिति।नन्ववस्थांतरेपिस्वमपीतोभवतीतिवचनम राम०
विरुद्धमितिचेन्नेत्याहनैहीतितत्रापिकथंस्वापःस्यादित्याशंक्याहतत्रेति।स्वपितिनामनिर्वचनसामर्थ्यमि ११३
द्धमर्थंनिगमयत्यतइतिनन्वस्वप्नांतशब्दोबुद्धांतशब्दवदवस्थास्वप्नमेवाचष्टेतदापिस्वमपीतोभवतीत्य

विरुद्धं स वै राजीवस्य सद्रूपब्रह्मप्राप्तेस्तुल्यत्वादनेनाह यत्रेति। स्वप्नदर्शनस्य पुण्यापुण्यकार्यत्वं प्रकटयति पु
ण्यापुण्यपापोर्हीति न्यक्तं पुण्यापुण्याभ्यामेव स्वप्ने संयुज्यते किं विविधादिभिरिति नात्र स्वाप्नयः संभवती
त्याह पुण्यापुण्ययोश्चेति न हि स्वप्नव्रत्तस्य युक्तेऽपि स्वाप्नयं स्यात्तत्रापि कामकर्मादिसंबंधसंभवादित्याश
क्याह ज्ञानेच्छाजन्यमिति सति जीवस्य कथं देवत्वाभावः संभवतीत्याशंक्याह मननस्येति तस्मात्तस्य स्यैतः प्राप्त्ये
व्याख्यानः तेन परामर्शहेतुमेव स्पष्टयति स्वमात्मानमिति स्वापितिनाम निर्वचनफलं दर्शयति गुणेति स्व
प्ते स्वरूपावस्थानस्य मुख्यस्यासंभवान्मुक्तत्वेनानुत्थानप्रसंगात्स्वरूपावस्थानप्रसिद्धेर्निमित्तं वक्तव्यमि
ति पृच्छति कथं पुनरिति ज्वरादिरोगग्रस्तस्य स्वभावस्थितौ प्रसिद्धः श्रमापाकस्य सुप्तं च श्रमापनोदावस्था
नं तथा च तत्र स्वरूपस्थितिप्रसिद्धिरविरुद्धेत्याह ज्वरादीति संगृहीतं समाधानं विवृणोति जागरिते हि
ति करणानामनेकव्यापारनिमित्ता ग्लानिर्भवतीत्यत्र मानमाह श्रुतेश्चेति॥ अनुभवसमुच्चयार्थश्चकारः सु
प्तावस्थायां करणानामुपरतौ प्रमाणमाह। तथा चेति सुषुप्तौ प्राणस्यापि व्यापारादिविदुपसंहृतत्वमाश
ङ्क्याह करणानीति अन्यथा मृतिभ्रान्तिः स्यादिति भावः जीवस्यापि बाह्यव्यापारः स्यादिति चेत्तत्रैवं करणाभावा

दित्याहतदेतिननु सुषुप्ते श्रमापनोदमात्रं न स्वरूपावस्थानं तत्कुतो लौकिकी प्रसिद्धिरित्याशंक्याह।नान्यत्रे
तिउक्तमर्थे लौकिकदृष्टांतेन स्पष्टयति दृश्यते हीति बृहदारण्यकश्रुत्यालोचनायामपि सुषुप्त्यवस्था
यामवस्थाद्वयजनितश्रमापोहार्थं बलनीडप्राप्तिर्गम्यत इत्याह तद्यथेति तत्रेति सुषुप्त्यवस्थोच्यते यथो
४ जी क्तोर्थो हि जीवस्य ब्रह्मण्यवस्थानं तस्मिन्निति यावत्।स शब्दो दृष्टांतविषयः शकुनिविषयो वा।अप्राप्ये
तिच्छेदः।पथ्यामंचाक्रोशनेन मंचस्थो देवदत्तो लक्ष्यते तथा तन्मन इति मनसि स्थितो जीवो लक्ष्यो भक्ती
त्याह मंचाक्रोशनवदिति।न केवलं प्रकरणाद्याशब्देन परा देवता लक्ष्यते अन्यत्र प्रयोगदर्शनाच्चेत्या
ह।प्राणस्येति।प्राणशब्देन परदेवता लक्षणायां फलितमाह तदिति प्राणमेवोपश्रयत इति विद्यानात्मत्व
त्रहेतुमाह प्राणबन्धनमिति।वर्तमानस्थानं तत्वोक्तमुच्छाययत्येवमिति।आह अशनापिपासे सोम्ये
त्यादि तिशेषः।किमभिप्रायः सन् पिता पुत्रं प्रत्येवमाहेत्याकांक्षायामाहान्नादीति।अन्नादीनि कार्याणि
कारणान्यवादीनि तेषां यथा परंपरातन्यापि जगतो यत्सत्त्वं क्षरणमस्तीति दर्शयितुमिच्छन् पिता पुत्रं प्रत्य राम ११५
शनेत्यादिकं वाक्यमाहेत्यर्थः।अशनेत्यस्य सन्तत्वाभावेपि कथं तदर्थो व्याख्यायतेत्राह सन्निति

पकारस्य लोपे नास्मिन्प्रयोगे मन्थप्रत्ययः प्रयुक्तस्तथा च तदर्थोऽग्निरविरुद्ध इत्यर्थः ॥ तत्राशनायापिपासयोः
सत्त्वं विज्ञापयति। यत्तेति सामान्येनोक्तं नाम विशेषतो ज्ञातुं पृच्छति किं तदिति। यत्काठिनमन्नं पुरुषे गाशि
तं तत्पीनाश्रायोनयंतइति संबंधः। तदेति परिणामावस्थोक्तिः रथोत्पन्नस्य भुक्तस्य जीर्णत्वानंतयमुच्यते क
थं तदानाश्नो गौणात्वं तदाह जीर्णे हीति। तिनद्यथेत्यत्र तच्छब्दार्थमाहनयत्वेति। एतस्मिन्नर्थे दृष्टांत उच्यत इति शेषः
। अशनायेति कथमयामाख्यानमशनायाइति हि वक्तव्यं तत्राह विसर्जनीयेतितत्रेत्यस्य व्याख्यानमेवं स्त्री
त्यपामशितमनेन त्वे सतीत्यर्थः। अद्भिः पीतानामिरिति शेषः सत्रेति शरीरनिर्देशः। अन्नस्य देहमलत्वमाकां
क्षायत्वं कं सुस्वादयति कथमित्यादिना। तथा पुरुषभुक्तान्नवदिति यावत् तथापि कथं सतो मलस्य सिद्धिरि
त्याह यावितिसतो मलत्वस्य वास्तवं रूपं दर्शयत्येकमिति तस्य सर्वकल्मषाधिष्ठानत्वेन परिणामवादं शुद्धस्यान्नि
यस्मिन्निति अध्यासे मलकारणमाह विधयेति प्रजाः सर्वाः सन्मूलाः सदायतनाश्चेत्युक्तमर्थे दृष्टांतेन स
मर्थयते। नहीति सत्प्रतिष्ठाः सदायतनाश्चेत्यनयोरर्थे भेदाभावमाशंक्याह अंतं चेति। प्रतिष्ठाशब्दस्य ल
यवाचित्वादायतनशब्दस्य चाश्रयविषयत्वान्न पौनरुक्त्यमित्यर्थः। लयशब्दस्य सुषुप्त्यादिविषयत्वं वार

यत्तिासमाप्तिरित्तिसम्यगाप्तिः समाप्तिरितिप्राप्तिरत्र विवक्षितेति शंकां वारयत्यवसानमितितस्याभावेन
तुच्छत्वमुत्पलं निरस्याति। परिशेषयति अन्नात्मशुंगद्वारा सतो मूलस्याधिगतेरनंतरमिति तच्छब्दार्थः। पिपास
तीत्येतन्नामा पुरुषो यस्मिन्काले भवतीति योजना। कथं पिपासतीत्येतन्नाम पुरुषस्य गौणमित्याशंक्याह द्रवी
कृतस्येति। भवत्वपां तेजसा शोष्यमाणत्वं किंतूवतेत्याशंक्याह नितरां चेति। तदा पानेछावस्था या पिपासेत्यर्थः
॥तेजसोपशुद्दकनेतरत्वमुक्तं तत्र श्रुतिमवतार्य व्याचष्टे। तदेतत्राहेति उदन्यमिति वक्तव्ये कथमुदन्येत्युक्तं तत्र
त्राहोदन्येतीति तत्रापि तेजसः स्य यीत्येतत्। पथाशनायेति छांदसं तथा तेजस्युदन्येत्यपि छांदसमेवेत्याह
एवं वदतीति। अन्नद्वारा सतो मूलस्याधिगमवदंबुद्वारापि तस्याधिगतिरस्तीत्याहा यामपीति तेजःशुंग
द्वारापि सतो मूलस्य प्रतिपत्तिरस्तीत्याह। सामर्थ्यादिति। त्रिवृत्करणप्रकरणादिनियावत्शरीरस्य भक्ततत्रयक्तो
यत्वमेतत्छब्दार्थः पथापर्वमन्नशुंगेन देहेनाप्नाख्यमूलं गम्यते इत्यादिश्याख्यातं तथा तेजःशुंगेन देहे राम॰ ११५
नतेजोमूलं गम्यत इत्यादिव्याख्येपमित्याह एवं वदतीति। वज्रांशुंनुवादएवैकं कथमित्याशिवाका मासते एवं
हीति। इत्युक्तायाः नामकृपप्रसिद्धद्वारेणापयोज्य देहाख्यशुंगस्यान्नादिकारणानां परंपरया सदाख्यं मूलम्

क्त विशेषाणां सन्मूर्त्तमन्विच्छेत्तु पदेशेन भूवेन केनचित्त्वायपि त्वाद्यवस्थायां शरीरमेकैकमन्तारब्धमित्याक्षेपे
प्राप्तेयदस्मिन्नाकरोतीति जः प्रभृतीनामुपयुज्यमानानां स्वस्वभावानुसारेण संघातस्योपचयकारित्वं वक्त
व्यं प्राप्तं नादेहस्य वे शरीरेषु सर्वभूतकार्योपलंभाद्य वस्थायां प्रमाणाभावात् दृश्यमाने संघाते कस्य भूतस्याकि
यत्कार्यमित्यपेक्षायामन्नमशितमित्याद्युक्तमेव द्रष्टव्यमिति पूर्वोक्तं व्यपदिशतीति योजना। सतोमूलस्यव्य
वहारसत्यत्वं वारयति परमार्थेति। वस्तुतो नाविद्यासंबंधस्तस्यास्तीत्याहाभयमिति। अविद्याकार्यसंबंधोपिप
रमार्थतो न तस्यास्तीत्याहासंत्रासमिति। उभयसंबंधाभावे समुद्भवान्निखिलदुःखत्वेनयरमानंदत्वं तस्यासिध्य
तीत्याह निरायासमिति। पूर्वोक्तमेव व्यक्तीकरोति नत्रैवेति किंतदन्नमशितमित्याद्युक्तं तत्राहान्नादीनामिति
सीमन्धातुकं त्वगसृङ्मांसमेदोमज्जास्थिशुक्राख्याः सप्तधातवः तेषां संहतिरूपमित्यर्थः। तेजोबन्नकार्यभूत
देहस्यैवान्नाहारस्यान्नत्वं निरूपितमिदानीमरणाद्वारेण पितन्निरूपयितुमारभते सायमिति। तेजहेत्युपक्रमवहम
नंतेति स्फुटं। वाग्व्यापारस्यमनसि लयेहेतुमाह। मनः पर्वेकोहीति प्राणसंपत्तिर्मनसस्तदधीनत्वं। मनोव्या
पारानिरुपवक्षणानदेनुच्यते। प्राणाश्चतदेत्यविसंभोवस्थाकथ्यते। कथं प्राणस्यस्वर्गतिमुपसंहृतवान्
^ढ

करणात्वं न स्यात्। संवर्गो विद्यायामिति। तत्राहि प्राणाः संवृङ्क्ते वागादीनीन्द्रियमनोयुक्तं तस्य स्वात्मन्युपसंहृतकरण-
त्वमित्यर्थः। तेजसीति भौतिकमाध्यात्मिकं तेजो गृह्यते जीवतीत्याहुरिति संबंधः। सकरणस्य सप्राणस्य च
मरतसर्गस्य परस्यां देवतायां उक्तक्रमेणोपसंहारे पि जीवस्य। किमायातमित्याशंक्याह। तदैवमिति। तस्यांप-
रस्यां देवतायां उक्तेन क्रमेणातेजस्युपसंहृते सतीतियावत्। स्वमरत्वं मनसो मरत्वं मरतयं चकं। निमित्तो यसंहा-
रादन्यत्र निमित्तं मनो विवक्षितं। सत्सं पन्नस्य सत्याभिसंधेर्न पुनरुत्थानमित्येतत्तदृष्टांतेन स्पष्टयति पये-
ति। अभयं देशं प्राप्तो न पुनः सभयं देशं गंतुमिच्छतीति शेषः। यस्त्वनृताभिसंधो यथोक्तयानीत्यानस-
त्संपन्नस्तं प्रत्याह तत्रैवत्विति। अस्यैति षष्ठ्याः सर्वज्ञगकृत्कमसंसारी संसारी चेति छेदः। सत्तादेर्विशेषं दर्शि-
यति परमार्थेति। कल्पितस्य जगतः स्वरूपं प्रत्यस्तमयात्विकमिति शंकं वारयति सत्वमिति तत्वेन स-
हितमपि सत्त्वमित्याशंक्याह यायात्म्यमिति कथमेवमर्थत्वमात्मशब्दस्य लभ्यते तत्राह आत्मशब्दस्ये-
ति। सतोभवत्वात्मत्वं ममतु किं स्यादित्याशंक्याह तदिति संदेहास्पदमेव विशिनष्टि अहन्यहनीति संदेहे हे-
तुमाह येनेति तेन संदिग्धमेतदिति वक्ष्यमाणसंबंधः। संदेहव्यावृत्तिस्ताहि कथमित्यत आह अतदिति पुत्रस्य

प्राप्तसंदेहापोहार्थमुत्तरग्रंथमुपक्षिपयत्येवमितियथेत्यादिदृष्टांतमवतारयतिपन्यच्छसीतिप्रत्यहंसुषु।
प्तेसर्वाः प्रजाः सत्संपद्य सत्संपन्नाः स्मोवयमितिन विदुस्तदज्ञानं कस्मात्कारणादितिपन्मांपृच्छसितत्रेद
शृणु यादृशं ज्ञाने कारणमस्ते दृष्टांतं शृणु त्वमिति योजना। यथा सदृष्टांतः स्पष्टोभवति तथोच्यते इत्याह य
थेति पुनर्मधुपदं क्रियापदेन संबध्यादावज्ञाने कोधप्रदर्शनार्थं। मधुकृतो मधुलिह्वा रक्तवमाकांक्षाय
वैकं दर्शयति कथमित्यादिनानानागतीनांनानाफलानांइत्येतद्धरसानांकृष्यमेकत्वेत्याशंक्याह मधुत्वेनैकतारू
६५ वस्यार्थं इति मधुत्वमिति। यथेत्यादिव्याचष्टे तेरसाइति उक्तमर्थं वैधर्म्यदृष्टांतेनस्पष्टयति यथाहीत्यादि
नाडहैति प्रकृतदृष्टांतोक्तिः। दृष्टांतमन्यथाप्रतीतिकमाह यथेति। रसानामचेतनत्वेन विवेकानर्हत्वात्कथं चेत
नवतामेव दृष्टांतः स्यादित्याशंक्याह यस्मादिति एवंयथोक्तरसदृष्टांतवशेनेति यावत्तेननानामयिसुषुप्त्या
दौना प्राप्य एकं दितनयारसतुल्यत्वान्नेषाविवेकानर्हावस्थापत्तिमात्रेप्रकृतमुदाहरणमविरुद्धमितिभावः।स
तासंपन्नानामपि पुनरुत्थाने मुक्तानामपि नतत्स्यादित्याशंक्याह संसारिणइति। मयपरपोलिमेत्यादावताराय
नि।तां प्रजाइति इतः सद्विज्ञानरहितेभ्यः सकाशादिति यावत्।। यमराभावमितितच्छब्दो ध्याहर्तव्यः। प्रश्रं

तरं दृष्टांतवत्ताद्रुश्यापयतीति यथेति। सतो ह्यागतानामस्मीत्युत्थितस्य ज्ञानाभावं दृष्टांतेनोपपाद्यादर्पितमुत्तरग्रंथमु
त्थापयतीत्युक्तश्रुतिश्चागमनावध्यपरिज्ञानं तत्रेत्युक्तं। प्रकृतं रंध्राविष्टं दृष्टमिति विनष्टादिति लोके दृष्टमिति
संबंधः। जीवात्मप्रत्यहं सुषुप्त्यवस्थायां मरणप्रलययोश्च कारणाभावं गच्छंतोपि न विनश्यंतीति यदेत
न्मे स्थितियोजना। जीवविनाशशंकमानस्य प्रतिबोधनार्थमुत्तरं वाक्यमुत्थापयति तथेति जीवस्यनाशाभा
वं वक्तुमादौ दृष्टांतमाह अस्येति। ननु रोगग्रस्तायां वा तोयहृतायां वा शाखायां प्राणोपसंहारे पि तु नो जी
वोपसंहारः संभवति तत्राह वा गिति। ननु वृक्षे जीवस्य सद्भावे तत्रोपसंहारानुपसंहारौ वक्तव्यौ तत्रैतस्य सत्वे
न कुतस्तस्य मतं तत्राह जीवेनचेति। रसस्रावणावधेयादिति संबंधः। वृक्षशरीरे जीवस्य सत्त्वे लिंगमित्यस्योत्तरा
चित्रदीयामेकां शाखां जहातीत्याशंक्याह अशितेनेति। जीवोपसंहारे लिंगमिति शाखा शुष्यतीति तत्राह जीवा
स्थितीनीति। जीवस्यास्थितिर्निमित्तं यस्येति विग्रहः। तथा शाखायामुक्तप्रकारेणेति यावत्। यत्तु वैशेषिकैर्वना
शिकाभ्यां स्थावराणां निर्जीवत्वेनाचेतनत्वमुक्तं तदेतान्निरस्तमित्याह वृक्षस्येति। आदिशब्दो वृद्धिमारा
दिसंग्रहार्थः। स एष वृक्षो जीवेनात्मनानुप्रभूत इति दृष्टांतश्रुतिः। श्रुतिदृष्टांतविवक्षितमंशमनघस

ष्ठीति क्रमाद्यथा[illegible]थेत्यादिना जीवस्य सुषुप्ते नाशाभावे दृष्टांतरमाह कार्यशेषे चेति तस्मिन्सति सुषुप्तोत्थिता
पुनरुत्थितस्य कार्यस्य शेषोऽस्ति यस्मिन्कर्मणि तदिदं ममासमाप्तमिति स्मृत्वा तस्य समापनदर्शनाच्च स्वापे जी
वो न नश्यतीत्यर्थः। मरणात्प्रागेव तन्नाशाभावे दृष्टांतरमाह। जातमात्राणामिति। आद्यश्चकारः समुच्चये द्वितीयो वधा
रणे। जीवस्य प्रलयात्प्राग्विनाशे कारणांतरमाहाग्निहोत्रादीनामिति इतिशब्दो जीवस्य नित्यत्वोपसंहारार्थः। य
दुक्तं सन्मूलाः सोम्येत्यादि तत्र चोदयति कथं पुनरिति निरिक्षरायोने कार्यकारणत्वमिति शंकमानं प्रति बोध
यितुमुत्तरं वाक्यमुपादत्ते यथेति स्थूलस्य कार्यस्य सूक्ष्ममुख्यकारणत्वमेतदित्युच्यते। अस्य सौम्य महतो
वृक्षस्येति प्रवृद्धं वृक्षं परामृश्य तद्दर्शनि। यमेतमणिमानं न निभालयस एतस्याणिम्नो बीजस्येति संबंधः। त
थापीत्यत्यंताणुत्वाद्दर्शनेयोत्यर्थः। अत्यंतसूक्ष्माद्बीजादत्यंतस्थूलस्य वृक्षस्योत्पत्त्ययत्नलंभो नः शब्दार्थः।
सन्मूलाः सोम्येत्यादिश्रुत्या दृश्यते त्विति न्यायेन च जगतः सत्कार्यत्वे सिद्धे ब्रह्म मन्तरेणापि तन्निर्णयसंभवा
त्किमिति श्वेतकेतुः श्रद्धत्स्वेति पित्रा नियुज्यते तत्राह यद्यपीति सन्न्यायमपि श्रद्धीयां कथं बाह्यविषयासक्तम
छां मनसोऽसंतसूक्ष्मेषु अर्थेष्ववगमः स्यादित्याशंक्याह। श्रद्धायां त्विति मनःसमाधानवशाद्बुभुत्सितस्यार्थस्या

५६

छां०भा०टी०
११८

वगतिरित्यत्रबहुतरापकृष्टातिसंवादयत्यप्सुत्रेतिप्रत्यसतोनुपलभ्यमानसान्तोलीनीतिमन्वानःशंकतेयदीप
दीतिअत्रानुपलभ्यमानस्यापिसत्त्वमाशंक्याह।इत्येतदितिअप्रत्यक्षस्यापिजगन्मूलस्यास्तित्वंप्रतिपादयि
तुमुक्तस्यैवार्थस्यभवतारयतितथेतिनोपलभ्यतेस्वेनप्रकारेणेतिशेषः॥इतीममर्थंप्रत्यक्षीकर्तुंयदीक्षमित
हिदृष्टान्तमत्रस्पष्टीविनियोजना।रात्रेरस्तुपानन्तर्यमथशब्दार्थः।जगन्मूलंस्वतोप्रत्यक्षमपिप्रत्यक्षमुपाया
न्तरेणेतिपित्रोक्तोर्थस्तंप्रत्यक्षीचिकीर्षुर्घटादावुदकेपिंडरूपंलवणंरात्रौप्रक्षिप्यतदन्यथानंतरंप्रातःका
लेपितःसमीपंप्रवेतकेतुर्गतवानित्याहसहेतियथातत्पिंडरूपंलवणंप्रक्षेपात्प्राग्भूजेथानविज्ञानवानितिसं
बंधः।उदकेप्रक्षिप्तंलवणंविमृश्यापिनाविज्ञायतेचेदसदेवतर्हिनास्तीत्याशंक्याहविद्यमानमेवेतिकिमिति
नहिचक्षुषास्पर्शेनवानोपलभ्यतेनत्वाहाप्सिति।कथंतर्हितस्यविद्यमानत्वमवगन्तव्यंतत्राहयथेतियदाविपि
डरूपंलवणमुदकेक्षिप्तमवमृश्यापिचक्षुःस्पर्शनाभ्यांनलंवेत्सितथापितत्तत्रविद्यतएवयतस्तस्याप्यामा
स्वमातामपितत्रोपायान्तरेणोपलभ्यतेइत्येतमर्थंपुत्रंप्रत्याययितुमुत्तरंवाक्यमित्यर्थः।यथाशब्दोपद्यपीस
द्धेतद्दृष्टान्तादिव्याचष्टेलवणमितिवर्जनइतइतीदंवचनंबुद्ध्वाजगामेतिसंबंधः।दृष्टान्तमन्यदपीत्यर्थेतिकमाहसे

राम०
११८

वमुक्तवंतमित्यादिनासतोजगन्मलस्यास्मिन्देहे सत्वं व्यापकत्वमवगमेतेतदाह वावेतिअत्रवाचेत्यादिनात्रैवक्लि
लेत्यस्यपौनरुक्त्यमाशंक्याथेविशेषं दर्शयति यथाचेत्यादिना। उपायांतरजिज्ञासयापृच्छति यद्येवमितितर्हीत्य
ध्याहृत्य पतस्येत्यादिनासंबंधः। सतोमलस्योपलंभेनुपलंभेवाप्ति स्यादित्याशंक्याश्यद्दष्टंमात्यादिति बुभुत्सित
मुपायमुपदर्शयितुमुत्तरग्रंथमवतारयति तथेतियथापमुपायः शक्यो ज्ञातुं यथालोके प्रदर्श्यते दृष्टांतद्वारा हपर्येति।
तमेव दृष्टांतं व्याचष्टे हे सौम्येतियथादित्यमोपेतो यत्किंचिदिति सिमुखो विक्रोशति तथासतत्र विक्षिनेदेशे शब्दं
कुर्यादितिसंबंधः। प्रादि-त्यस्यार्थमाह प्राग्गेचइति। नस्येवविवक्षितमर्थं कंपति प्राप्नुवइति वक्ष्यमाणाप्रक्रि यद
रैविकल्पाघोवाशब्दः॥ यथाबंधनं बंधनमनुसत्त्येति यावत्। पंडितोमेधावीति विशेषणाद्वयस्यावछेद्यं दर्श
यतिनेतरइतिव्याख्यानं दृष्टांतं सौतंसोपस्कारमनुवदति यथेत्यादिना दार्ष्टांतिकं व्याचष्टे एवमितिआदिशब्दे
नवा याकाशो गृह्यते। मयट्च विकारार्थः। देहाराज्यस्यानेकानर्थसंकटत्वं कथयतिवातेनेति॥ शीतोष्मादीत्या
दिपदेनरागद्वेषादिद्वंद्वंगृहीतं तेनानेकेनद्वंद्वेनजातेसुखदुःखं चतदुपेतमिदं देहाराज्यमित्येतत्॥ बंध्वादीत्या
दिशब्दोमित्रक्षेत्रादिविषयः सुखापासुखापादे त्यादिपदंश्वविद्याकामवासनासंग्रहार्थं। देहाराज्यप्रविष्टस्यजं

शां॰भा॰टी॰ तोर्विक्रोशनप्रकारं सकारणं संसूचयन्नहमित्यादिनाज्ञानस्य सदाद्युः विलक्षणं कां वा रूपतिं कथं विद्वेवेति। आपाततो ब्रह्म
११८ विन्मात्रेणामुक्तं धनत्वासिद्धेर्विशिष्टानधिव्रह्मलिङ्गमिति यद्वा सादयति तदा सुखी स्यादित्युत्तरत्र संबंधः। संसारवि
षयं दोषदर्शनं तस्य क्षयिष्णुत्वादिज्ञानं तस्य मार्गो विवेकः सद्यस्याचार्येणादर्शितो विद्वान्‌ सदर्शितसंसार।
विषयदोषदर्शनमार्गः। आचार्येण साधनचतुष्टयसंपन्नस्याधिकारिणः संसारान्मोक्षितलप्रकारं दर्शयतः
लिनासीति। यद्यपि वाक्यार्थज्ञाने वाक्यमेवोपायस्तथाप्याचार्योपदेशजनितातिशाय दर्शनात्तदुपदेशो वगत्यं
तवाक्यार्थज्ञाने प्रथमो हेतुरुपदेशमात्रापेक्ष्यना वगत्यंत वाक्यार्थधीस्तस्य प्रमाणाद्यसंभावनानिरसनस
मर्थो विचारो मेधावि शब्देन विहितः तस्य अज्ञातिशयवति प्रयोगादिति भावं पुरुषप्रयत्न येहेतुमाह। सामर्थ्यादि
ति। अक्षाद्युपपदेः सत्त्वज्ञमपुरुषप्रयोगस्यानुपपत्ते दोहादि स्थित्यनुपपत्तेर्वेत्यर्थः। यावदित्यादिवाक्यार्थ
स्यापयति येनेति यत्स्वेवादिति सामर्थ्यात्पुरुषप्रयत्नापेक्षयति अर्थशब्दस्य सत्संपन्ने देहमोक्षादानंतर्यमर्थो राम॰
भविष्यतीत्याशंक्याह। नहीति। अर्थसंपन्नस्य उत्तिविदेहमुक्तिर्मुक्ता मासि यतिनन्विति। अप्रवृत्तफलानीति छेदः। ११८
उत्पन्ने चेति ब्रौरीरोप्यर्थः। विमतानि कर्माणि ब्रह्मज्ञानेन नक्षीयंते कर्मत्वात्प्रवृत्तफलकर्मवदित्यपेक्षेसीपंते चास्मके

^ वस्था

मोरितिज्ञानाग्निःसर्वकर्माणीत्यादिश्रुतिस्मृतिविरोधात्कालात्ययापदिष्टतेतिशंकते।अथेति।अतिप्रसंगान्तरमु
तिस्मृत्योर्यथाश्रुतार्थत्वेनिबारिहरतितदेतिज्ञानस्यानर्थकत्वमुक्त्वापक्षांतरमाह।देशांतरेति।यथाग्राममप्राप्नुया
योऽध्वोरथोवेतिज्ञानेसत्यसत्यंतरायेकस्यचिदेवग्रामप्राप्तिर्भवतिनत्वेवंतरायवतस्सतत्त्वज्ञानेपितत्प्राप्तिर्येयात थास
मुत्पन्नज्ञानस्यापिकस्यचिद्देवभोगेनक्षीणकर्माशयस्यमोक्षेनज्ञानमात्रादित्यनियमेतेलवामित्यर्थः।वमेतदे
तोरप्रयोजकत्वंवस्तुत्तरमाहनकर्मणामितिसंग्रहवाक्यमेवप्रपंचयन्नादौनकर्षैस्फुटयतियदुक्तमितितत्रहेतुमा
हविदुषइतिप्रामाण्यपादेहांतरारंभेनद्वितीयप्रसंगादितिशेषः।ऋत्वंतरमाशिन्यशंकतेनान्विति।तथाचानारब्धक
र्मवशाद्विदुषोपिदेहांतरमारब्धव्यमितिशेषः।तत्प्रामाण्यमंगीकरोतिसत्यमेवमितितर्हिविदुषोपिदेहांतरस्यनार
ब्धकर्मवशादावश्यकत्वंनेत्याहनथापीतिविशेषमेवाकांक्षाद्वाराविशदयतिकथमित्यादिना॥प्रवृत्तफलत्वमेवस्फुटय
तिपैरितिउक्तमर्थंदृष्टांतेनस्पष्टयतिपथेतिलक्ष्यस्यव्याधोभेदनंतत्समकालमेवबाणादेरूर्ध्वगतिप्रयोजननेना
स्तीतिनसिद्धिरितिलक्ष्यमुद्दिश्यमुक्तस्यतस्यारब्धवेगस्याप्रतिबंधेनतत्पातनादितत्स्यवेगक्षयादेवसिद्धिरितिदृष्टांतत्व
द्विघार्थेदेहविघाताभावानंतरंफलंनास्तीतिनकर्माणिनिवर्त्तन्तेकिंतुभोगक्षयादेवतस्यफलस्यविवर्त्तित्वादित्यर्थः।

प्रवृत्तफलेभ्योप्रवृत्तफलानांकर्मणांविशेषमाह।अन्यानित्विति।नचाप्रवृत्तफलानांकर्मणांक्षयोप्रसिद्धस्तथाविधस्यै
वपायस्याप्रायश्चित्तेनप्रक्षयोयोगादित्याह।प्रायश्चित्तेनेवेति।आरब्धफलानीतिरिक्तानांकर्मणांज्ञानान्निवृत्तौप्राप्तिस्य
नैःशेपति।ज्ञानाग्निरित्यादिना।प्रवृत्तायवृत्तफलेषुकर्मसुप्रसिद्धविशेषफलितमाह।उत्पत्तिजीवितादीत्यादिशब्देन
पुत्रकलत्रद्रव्यक्षेत्रादिदृष्टग्रहणे।मुक्तस्याप्रतिबद्धेश्वादेर्यावद्देगक्षयंगतिध्रौव्यव्यवहारवदारब्धकर्मणांफलभोगो
वश्यमेवस्यादितिसंबंधः।यतश्चारब्धकर्मणांभोगादेवक्षयस्तस्येत्यादिनायच्छिरस्त्वंसत्संपत्स्येत्तंतघुक्तमेवेति
कृत्वायथोक्तस्यदोषस्यसघःशरीरपातात्स्विलक्षणास्याशंकानुपपत्तिरित्युपसंहरति।इतीति।श्राघस्येतिशब्दस्य
तस्येत्यनेनसंबंधः।यत्तत्त्वज्ञानेपिज्ञानेपावज्जीवंविहितानिकरोत्येवेतितत्राहज्ञानोत्पत्तेरितिज्ञानस्यनानर्थक्य
मविद्यातत्कार्यनिवर्त्तनेनसत्संपत्तिहेतुत्वान्नाप्यनैकांतिकफलत्वमंतरायाभावादित्युक्तं।इदानीमर्चिरादिप्रा
गेप्राप्त्याव्यावाचैवाविधानिचजितमात्रेणावासत्संपत्तिरितिसंदिहानःशंकते।आचार्यवानितिसंशयानस्यसंबो
धनार्थमुत्तरंवाक्यमवतारयति।तथेतिनन्वेषसंसारिणोमरणक्रमोनतुविदुषःसत्संपत्तिक्रमस्तत्रयोविशेष
स्यवक्तव्यत्वादतआहसंसारिणइतिकरणोपरमेतेजःसहचारितमतःसूक्ष्मोपसंहारेचविशेषविज्ञानाभावःस

नस्व विद्वद्विदुषोरित्यर्थः। कस्तर्हि तयोर्विशेषस्तत्राहाविद्वानिति तत स्तस्माद्ज्ञातात्सदात्मनः सकाशादितियावत्।
एकदेशिमतमुत्थाप्यप्रमाचष्टे अन्ये त्विति। भवतु विदुषोपि तदभिसंधिपूर्वकं गमनमित्याशंक्याह नहीति। अहि
शब्देनास्यागतौ प्रत्येते। सद्धितान्नवतो गमनायोगे हेत्वन्तरमाहाविद्येति विदुषो विद्याकामकर्मणामभावे प्रमाणमा
हाथयो काम इत्येतिनानुकामप्रविभय एवात्रश्रूपतेनाविद्याकामकर्मनिर्मोकस्तत्राह नदीति यथा नद्यो गंगाद्याना
मरूपे विहाय समुद्रं प्रविशंति तथाविद्वान्नामरूपे हित्वा परं पुरुषमुपैतीति दृष्टांतदार्ष्टांतिकाभ्यां श्रुतेर्नामरूपबीजा
वस्थाविद्याप्रलयो गम्यते तेन चाविद्याकामयोरभावे कर्मोपयतिस्तस्मान्न विदुषो गतिरविकासत्संयतिरित्यर्थः।
विमतः सत्संपन्नः पुनरावृत्तिमर्हति सत्संपन्नत्वान्मरणकाले सत्संपन्नबद्धमतो वा विशेषविज्ञानाभावो नात्यंतिको
विदुषो विशेषविज्ञानाभाववत्वान्मरणकालीनविशेषविज्ञानाभाववदित्यनुमानाद्विद्वदविदुषोरविशेषमन्वा
नः शंकते परीति। तत्रान्ततामिसंधत्वं तावद्गामिसंधिमज्ञिप्रत्वं चोपाधिरित्यनुमानदूषणं दूषयितुमुक्तं यस्पृष्टा
यपतितमयेति परीक्षणाय परीक्षाद्वारेणारक्षणार्थमितियावत्। यदस्य ग्रहणमात्रेणाबंधने प्रतिग्रहीतुरपि बं
धनप्रसंगात्तन्मात्रं बंधकारणमित्याहान्यथेति। ततएवान्तताभिसंधत्वादेवेत्यर्थः। ततएवेतितेनास्य कर्मे

णोकर्तृत्वादेवेत्यर्थः। न दृष्टान्ते विवक्षितमंशमनुवदन्नितस्तेतिनस्तुवास्तवंकर्तृत्वमित्याह स यथेति स य एषोतिलोम·
मीक्ष्याचष्टे पदात्मेतितत्त्वंतरसीति स्वमर्थोद्देशेन तद्ध्यैमावो विधीयते तत्रोद्देश्यशरीरस्य विशिष्टस्य विरोधाद
शरीरब्रह्मात्मत्वं विधातुमशक्यमिति मन्वानश्चोदयति कः पुनरिति त्वंपदेन वाच्यस्य लक्ष्यस्य वा ब्रह्मत्वायोगस्त्वया
न्यते नायोगीकारान्नद्वितीयः शरीरस्य वैशिष्ट्योपलक्षितस्य श्रोतृत्वाद्यध्यासास्पदस्य त्वंपदलक्ष्यस्य ब्रह्मसवि
धाने विरोधास्फुरणादिति परिहरति योहमिति विज्ञापयेदेति यद्वैराससहसंबंध। तस्य सतः सकाशादेषा।
धिकोभेदो वस्तुतस्त्वैक्यमिति मत्वाह नेनोत्तमयामिति त्वंपदार्थस्वेतकेतुं निर्धार्य तद्वास्येत्यादि व्याचष्टे
आत्मानमिति श्चत्वानार्थप्रकाशनं मानफलं तत्स्यस्वप्रकाशो ब्रह्मात्मानोपपद्यत इति मन्वानश्चोदयति किंपु
नरिति अत्रात्मनीस्मि संबंधः। स्वप्रकाशे प्रकाशाति श्रयस्यमानफलस्यासंभवेप्यध्यस्तस्यावजित्तत्फलं भवि
ष्यतीत्युत्तरमाह कर्तृत्वेति अत्र तस्याश्रवणादियाम तस्य मननाद्या विज्ञानस्य विज्ञानफलसिद्ध्ये चाधिकृतं
यमर्थे त्वंपदवाच्यमवोधा अन्नस्य स्वात्मनि क्रियाकर्तृत्वे फलमोक्तृत्वे च यन्निध्येवाधिकृतत्वविज्ञानं तस्मिन्दृष्टि
मानफलमिति योजना॥ यथोक्तं मानफलनमेव प्रपंचयति प्राज्ञेति अहमेवात्राधिकृतस्त्वेति चकारसंबंधात्

स्येयचस्येत्यर्थः ॥ विरोधमेवस्फोरयति नह्यीति प्रमाणफलमुपसंहरति तस्मादिति पीत्स्वमोहमितितिचेत्सस्वदेही

~~[illegible] संबंधि [illegible] धिको [illegible] मितिम [illegible] मितितिंय [illegible] तेकेनं [illegible]~~

नित्वात्स्येत्याद्याचष्टे आत्मानमिति अज्ञाताव्यप्रकाशनं मानफलं तस्य स्वप्रकाशे ब्रह्मणि नोपपद्यते इति मन्वानश्चोद

यति किं पुनरिति आत्मनीति संबंधः ॥ स्वप्रकाशे प्रकाशातिशयस्य मानफलस्यासंभवेप्यध्यस्तव्यावृत्तिरूपफलं

विष्यतीत्युत्तरमाह कर्तृत्वेति अश्रुतस्य श्रवणं यामतस्य मननं याविज्ञातस्य विज्ञानं फलं च सिद्धरूपे चाधिकृतं यम

र्थत्वंयद्वाच्यमभवीचामतस्य स्वात्स्वात्मनि क्रियाकर्तृत्वेफलभोक्तृत्वे च यन्मिथ्यैवाधिकृतत्वविज्ञानं तन्निवृत्तिमे

वफलमितियोजना ॥ प्रथ्यौक्तंमानफलनमेवप्रपंचयति प्रागिति अहमेवाबाधिकृतस्त्वेतिवकात्संबंधयस्येत्सेस

~~स्यर्थः ॥ विरोधमेवस्फोरयति नहीति प्रमाणफलमुप~~संहरति तस्मादिति तत्त्वमसीतिवाक्यं मुख्यैकत्वपरमिति स्व

पक्षमुक्त्वा परपक्षं शंकते तन्त्विति ॥ आध्यासिकमेकत्वं सामानाधिकरण्यात्त्वंवनामिति स्वयस्य दृष्टांतेनोक्तं सिद्धां

तं दूषयति नत्विति ॥ श्वेतकेतोः सन्मात्रत्वेतदज्ञानाद्योगादसद्गुरूपदेशासिद्धिरित्यर्थः ॥ किमध्यासवाक्यसामान्यास

ध्यासिकमेकत्वं सामानाधिकरण्याल्लब्धं किंवा मुख्यैकत्वे बाधकसद्भावादिति विकल्प्याद्यं दूषयति नेत्यादिनाद्वो

६०

पा॰भा॰टी॰ १२२

वेत्सुक्तिकां रजतमिति प्रत्ययेनेत्यादाविति शब्दपरं सामानाधिकरण्यं न वस्त्वैक्यं दृष्टान्ततयाऽध्यासवाक्यानामप्याह सि
ब्रह्मेत्यादेः श्रुत्यादीनामिति शब्दपरसामानाधिकरण्यवशाद्वस्त्वैक्यनिष्ठत्वं गम्यते न तत्त्वमसि वाक्यस्यावस्तु
निष्ठत्वमिति शब्दपरत्वाभावेन सामानाधिकरण्यस्य स्वरूपपर्य्यवसायित्वनिश्चयादित्यर्थः॥ उक्तत्वेति प्रकारेणो
क्तिः इह प्रवेशं दर्शयिष्यति स तत्तेजोऽबन्नमयं संघातमिहेति व्याकरिष्यति। जीवब्रह्मणोर्भेदग्राहिप्रमाणाविरोधा
न मुख्यमेकत्वं किं तु चैतन्यगुणयोगाद्गौणमिति द्वितीयं शंकते नन्विति यथाम्रदाडिकाणामेव घटादिकार्ये
